॥ श्रीदिग्विजयरामो विजयते ॥

श्रीमन्मध्वाचार्यकृतयोः अनुव्याख्यान-ब्रह्मसूत्रभाष्ययोः पाठभेदविचारः

(शोध पत्रिका)

लेखकः

पं. वीरनारायणाचार्यः पाण्डुरङ्गी

प्रकाशनम्

श्री उत्तरादिमठः

विश्वमध्वमहापरिषत्

श्रीजयतीर्थविद्यापीठम्, बेङ्गलूरु-४

मध्वाचार्यकृतयोः अनुव्याख्यान-ब्रह्मसूत्रभाष्ययोः पाठभेदविचारः

लेखकः

वीरनारायणाचार्यः पाण्डुरङ्गी[१]

यद्विद्याधीशगुरोः शुश्रूषान्या न रोचते तस्मात्।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥
दुर्वादिध्वान्तरवये वैष्णवेन्दीवरेन्दवे।
श्रीराघवेन्द्रगुरवे नमोऽत्यन्तदयालवे ॥

मध्वाचार्यः प्रायः अष्टशतवर्षेभ्यः प्राक् ब्रह्मसूत्रभाष्यमरचि। तथा गीता-उपनिषदादीनां च भाष्याण्यरच्यन्त। तत्र च ब्रह्मसूत्रभाष्ये (ब्र.सू.भा.) प्रथमतः त्रिविक्रमपण्डिताचार्यैः तत्त्वप्रदीपनाम्नी[२] व्याख्या अकारीति 'गुर्वाज्ञागौरवाट्टीकां कुर्वन्' [३]इत्यादिमध्वविजयादवगम्यते। तत्र पद्मनाभतीर्थकृतापि टीकोपलभ्यत इदानीम्। परन्तु तस्याः प्राचीनताविषये विप्रतिपद्यन्ते[४]। तदनन्तरं च जयतीर्थैः तत्त्वप्रकाशिकानाम्नी टीका व्यरचि। तस्याश्च बह्व्यष्टिप्पण्यः मुद्रिताः अमुद्रिताश्च इदानीं समुपलभ्यन्ते। तथा वेदगर्भनारायणाचार्यादिभीरचिताः व्याख्या अपि सूत्रभाष्यस्य मातृकागारेषु समुपलभ्यन्ते।

अस्य च सूत्रभाष्यस्य बहूनि संस्करणानि समुपलभ्यन्ते। एषु च प्रथमतया टि.आर्.कृष्णाचार्यैः कुम्भकोणे शतवर्षात्प्राक्, अनन्तरं रामतत्त्वप्रकाशग्रन्थालयात् बेळगांवनगरे प्रायः शतवर्षात्प्राक्, अनन्तरम् उत्तरादिमठात् (१९६०), तथा बन्नञ्जे गोविन्दाचार्यैः बेङ्गळूरु-उडुपीनगरयोः (१९६९-८०), पुनश्च बेङ्गळूरुनगरात् प्रभञ्जनाचार्यैः (१९९९) इति सर्वमूलान्तर्गततया, तथा पृथक् च भाष्यदीपिकासहिततया चेन्नैनगरे शतवर्षात्प्राक्, तथा भावदीप-तत्त्वप्रकाशिकासहिततया धारवाडनगरे राघवेन्द्राचार्य पञ्चमुखिभिः (१९८१), तथा के.टि.पाण्डुरङ्गीमहाशयैः इदानीं च (१९९८-२००२) बहुभिष्टिप्पणीभिः टीकाभिश्च साकं मुद्रणानि कृतानि समुपलभ्यन्ते। अनुव्याख्यानस्य[५] च पूर्वोक्तसर्वमूलसंस्करणानि विहाय उत्तरादिमठात्

---

[१] I am very much gratefull for the authorities of **Frecnh Istitute of Pondicherry**, especially for **Prof. S.P.Narang**, Head. Dept. of Indology, for extending all kind of support to write this artical. Thanks are due to **Pandit Tirumalacharya** who gave valuable inputs for this artical; **Vidyavachaspati Bannanje Govindacharya** for his suggestions; **Prof. Haridasa Bhatta** for his suggestions; **Pandit Balagaru Ruchiracharya** for his suggestions; **Dr. A.V.Nagasampige** who showed keen interest in this matter and arranged a lecture, in which a live debate was possible, on same topic in Poornaprajna Samshodhana Mandiram where he is Director; **Prof. V.Venkataraja Sharma, Prof. V.Srivatsankacharya. Pandit G.Mahabaleshvara Bhatta**, who readily gave their views on 'गवाश्वयोः'; **Pandit Srinivasa Varakhedi** for his suggestions; **Dr.T.Ganesan** who keenly suggested many things; and all the others for inspiration.

[२] अस्य तत्त्वप्रदीपः, तत्त्वप्रदीपिका, तत्त्वदीपिका, तत्त्वदीप इति वा व्यवहारः। 'तत्त्वप्रदीपाकृतिगोगणेन' इति (म.वि.१.४.)।

[३] म.वि. १५-७२।

[४] तथा हि नयचन्द्रिकायां नारायणपण्डिताचार्यैः द्विवारं सन्न्यायरत्नावलेरुल्लेखेऽपि न भाष्यटीकोल्लेखः दृश्यते। तथैव सुधायां 'टीकाकृतः' इति पद्मनाभतीर्थाः जयतीर्थैरुल्लिखिताः। तथापि तत्त्वप्रकाशिकायां यत्र कुत्रापि तदीयव्याख्याया उल्लेखाभावात् तेषां भाष्यटीकाकर्तृत्वे संशयः। तथैव व्यासतीर्थैः, राघवेन्द्रतीर्थादिभिः 'टीकासु च यदस्पष्टं तच्च स्पष्टीकरिष्यते' इति चन्द्रिकावाक्यव्याख्यानावसरे तदीयटीकाया अनुल्लेखाच्च तत्र संशीयते।

[५] अनुव्याख्यानम्, अनुभाष्यम् इति नामद्वयमप्यस्य दृश्यते। 'कृत्वा भाष्यानुभाष्येऽहमपि' इति न्यायविवरणे, 'व्याख्यां करोम्यन्वपि चाहमेव' इति अनुव्याख्याने च भगवत्पादैः निर्दिष्टत्वात्। तथा 'तत्कृतां ब्रह्मसूत्राणामनुव्याख्यां यथामति' इति, तथा 'सूत्रानुभाष्यपददीपनदीपरूपा' इति च पद्मनाभतीर्थभट्टारकैः उक्तत्वात्। 'स्वानन्दतीर्थः परतत्त्वसूत्रभाष्यानुभाष्ये' इति त्रिविक्रमपण्डिताचार्यैः उक्तत्वात्। 'अनुव्याख्यानसंबन्धदीपिकां प्रारभामहे' इति लिकुचशंकराचार्यैः अनुव्याख्यानसंबन्धदीपिकायाम्, 'अनुव्याख्यासुधाम्भोधौ गम्भीरे विहरन्ति ये' इति नारायणपण्डिताचार्यैः नयचन्द्रिकायाम्, इत्येवं भिन्नभिन्ननामभिः निर्दिष्टत्वात्। सुधायां च असकृत् अनुव्याख्याननाम्नः उल्लिखितत्वात्।

सुधया साकं मुद्रणान्तरम् (१९८२) अस्ति। अत्र मुद्रितसुधायाम् अनुव्याख्यानस्य केचन पाठाः कुम्भकोणपाठापेक्षया भिन्नाः इति संदृश्यते सुधादर्शिभिर्विद्वद्भिः।

तत्र भाष्यपाठे टि.आर्.कृष्णाचार्यपुस्तकमेव सर्वेषामुत्तरेषां पुस्तकानां मूलम्। तत्र का मातृका उपायुज्यत इति न ज्ञायते। प्रायः कुम्भकोणदेशीयत्वात्तेषां तमिळदेशे उपलब्धमातृकाः उपयुक्ताः इत्याशङ्क्यते। रामतत्त्व-उत्तरादिमठपुस्तकयोरपि किं मूलमिति न ज्ञायते। प्रायः टि.आर्. कृष्णाचार्य-पुस्तकमेव मूलम्। बन्नञ्जे गोविन्दाचार्यपुस्तकस्य तु तैरेवोक्तरीत्या उडुपीस्थपलिमारुमठीया प्राचीना हृषीकेशतीर्थलिखितत्वेन[६] संप्रदायागता एका मातृका, हृषीकेशतीर्थीयानुसारिणी पलिमारुमठीया रघुवर्यतीर्थीया[७], तथा पेजावरमठीया अन्या मातृका प्रतनतरा[८], पलिमारुमठीयरघुरत्नतीर्थलिखिता अन्या मातृका[९], तथा सोदेमठीया अन्या मातृका[१०], अन्याश्च बह्व्यः मातृकाः उपयुक्ताः। तत्र हृषीकेशतीर्थलिखितत्वेन संप्रदायागता एका मातृका इदानीमपि तत्र पलिमारुमठे वर्तते। पेजावरमठीया मातृका, अन्याश्च मातृकाः काः, तासां संख्या वा स्थितिर्वा न ज्ञायते। गोविन्दाचार्यैरपि सर्वत्र प्राचीनकोशे, प्राचीनकोशेषु, कोशान्तरे, कोशान्तरयोः इत्यादिना बह्व्यः मातृकाः अनिर्दिष्टाकारं दर्शिताः। ताः काः, तासां स्थितिः का इत्यादेरज्ञातत्वात् तासां विषये किमपि निर्दिष्टं वक्तुं न शक्यते।

प्रभञ्जनाचार्यैः प्रकाशितस्य सर्वमूलान्तर्गतस्य सूत्रभाष्यसंस्करणस्य तैरुद्घोषितदिशा मातृकाद्वयमुपयुक्तम्। तत्रैका मातृका जयतीर्थगुरुभिः अक्षोभ्यतीर्थैः लिखिता, अन्या च मातृका तच्छिष्यैः लिखिता[११] इति, तथा अन्याश्च बह्व्यः मातृकाः तदीयजयतीर्थमातृकाभाण्डागारे वर्तमानाः उपयुक्ताः, तथैव सर्वाण्यपि मुद्रितानि भाष्यपुस्तकानि पाठान्तरनिर्देशार्थमुपयुक्तानि इति च तैरुल्लिखितम्। परन्तु मया इदानींतनकूडलीक्षेत्रस्थाक्षोभ्यतीर्थमठाधिपतीनां सकाशे विचारणे कृते अक्षोभ्यतीर्थीयत्वेन उद्घोषिता मातृका वस्तुतः अक्षोभ्यतीर्थैः न लिखिता, किन्तु राघवेन्द्रतीर्थसमकालिकैः अक्षोभ्यतीर्थपीठारूढैः बिच्चगत्ति रामचन्द्रतीर्थैः लिखिता इति ज्ञातम्। एवं च रामचन्द्रतीर्थानां कालः क्रि.श १६७० इति निश्चितत्वात्, तदीयमातृकायाः कालोऽपि स एवेति निश्चीयते। एतज्ज्ञात्वा च मया एतद्विषये अनुयुक्तैः प्रभञ्जनाचार्यैः अपि एतदभ्युपगम्य आगामिनि सर्वमूलतेलुगुसंस्करणे रामचन्द्रतीर्थलिखितत्वेनैव सा मातृका उल्लिख्यते इति प्रत्यज्ञायत। तथा प्रभञ्जनाचार्यैरुपयुक्तायाः अन्यस्याः मातृकायाः विषयेऽपि इदानींतनबाळिगारुअक्षोभ्यतीर्थपीठारूढैः रघुभूषणतीर्थैरुक्तम्-- सा मातृका प्रायोद्विशतवर्षदेशीया तेषां मठे विद्यमाना, पूर्वं तैः इदानींतनपलिमारुमठाधीशानां विद्याधीशतीर्थानां हस्ते दत्ता, विद्याधीशतीर्थसकाशाच्च प्रभञ्जनाचार्यहस्तं प्राप्ता सा इति। तस्मात्तदुपयुक्तं मातृकाद्वयमपि इदानीमुपलभ्यते। परन्तु तयोः प्राचीनतमत्वाभावात्, अनेकापपाठयुक्तत्वाच्च नातीव प्रामाणिकता युक्ता।

चेन्नैनगरात् प्रकाशितं भाष्यदीपिकायुक्तं भाष्यपुस्तकं[१२] तु कीदृशमातृकामूलमिति न ज्ञायते। पञ्चमुखिप्रकाशितं भावदीपतत्त्वप्रकाशिकोपेतं पुस्तकं यद्यपि तद्भूमिकोक्तरीत्या अनेकमातृकाधारेण संशोधितम्, तथापि तत् कुम्भकोणपुस्तकं वा गोविन्दाचार्यपुस्तकं वा अनुसरति। तत्र विशिष्य उल्लेखार्हाः

---

[६] 'हृषीकेशतीर्थेन लिखितोऽयं ग्रन्थः' इति ग्रन्थान्ते लिखितं दृश्यते इति गोविन्दाचार्याः।

[७] द्र० गो.भूमिका संकीर्णग्रन्थानाम् (भा.५.पृ.२.), भागवततात्पर्यस्य च। रघुवर्यतीर्थीये एव स्पष्टतया हृषीकेशतीर्थलिखितपाठमवलम्ब्य लिखितम् इति उल्लेखो वर्तते इति। तथा विश्वाधिराजतीर्थलिखिते द्वादशस्तोत्रपुस्तके 'अस्मद् गुरुभिः (विश्वपतितीर्थैः) मूलपाठो नोपलब्धः, तस्मान्मया स लिख्यते' इत्युल्लेखो वर्तते इति च गोविन्दाचार्यैः मम सकाशे उक्तम्।

[८] ब्र.सू.भा.गो.पुस्तकम्.पृ.१४१,१७७। मुखेन उक्तं मम सकाशे यत्- सा मातृका पद्माकरालयरामेण लिखितम् इत्युल्लेखेन सहिता वर्तते। यद्यपि सा प्राचीना, तथापि न सर्वथा हृषीकेशतीर्थानुसारिणी। अत्र एव गीताभाष्ये अनुष्ठीय इति ईकारघटितपाठः अस्मिन्नेव पाठे लभ्यते, तत्र हृ.पाठस्य, रघुवर्यतीर्थपाठस्य चानुपलम्भात्।

[९] द्र० गो.भूमिका भागवततात्पर्यस्य।

[१०] मुखेन उक्तम्, अन्यत्र नोल्लिखितम्।

[११] भूमिका पृ.१४. सर्वमूलग्रन्थाः, व्यासमध्वसेवाप्रतिष्ठानम्, बेङ्गळूरु.१९९९.

[१२] बेङ्गळूरुनगरात् प्रकाशितं तदन्यदेव यत् भाष्यदीपिकाप्रकाशनसमित्या प्रकाशितम्।

पाठभेदाः न सन्ति। पाण्डुरङ्गिप्रकाशिते पुस्तकेऽपि तथैव। दौर्भाग्यवशात् प्रायः सर्वेऽपि कन्नडभाषानुवादा अपि न समीचीनं पाठमालम्बिरे।

तस्मात् गोविन्दाचार्यपुस्तक-प्रभञ्जनाचार्यपुस्तकयोरेव अत्र मुख्यतः पाठभेदोल्लेखित्वात् तदाधारेणैव विचारः प्रवर्तनीयः। तत्र प्रभञ्जनाचार्यपुस्तकेऽपि महत्तराः पाठभेदाः न सन्तीति न तत्रापि मुख्यतो विचारः, किन्तु गोविन्दाचार्यपुस्तकमूल एवायं विचारः। अत्र च गोविन्दाचार्यप्रकाशितस्य हृषीकेशतीर्थीयानुसारिपाठ(हृ.पाठ)स्य, जयतीर्थविरचिततत्त्वप्रकाशिकादृतपाठ(ज.पाठ)स्य च महान् भेदो वर्तते। कानिचन सूत्राणि हृ.पाठे न सन्ति[१३], कानिचन च अन्यथा पठितानि। भाष्येऽपि महानत्र भेदो विदृश्यते इति। अत्र च उभयोः पाठयोः समीचीनत्वाङ्गीकारे तयोः दृश्यमानस्य सूत्रभाव-अभावादिरूपस्य वैलक्षण्यस्य सूत्रपाठभेदस्य च नारायणावतारस्य भगवतः बादरायणस्य सूत्रकर्तुः अनेकविधसूत्रकृत्त्वे पर्यवसानप्रसङ्गेन भगवति दोषवत्त्वापादकत्वेन विचारणीयता। उभयोः पाठयोः दृश्यमानस्य भाष्यपाठभेदस्य च समीचीनताङ्गीकारे यद्यपि स एव दोषः, तथापि भाष्ये अनुव्याख्याने च पाठभेदास्सन्तीति प्राचीनव्याख्यास्वेव[१४] दृश्यते। तस्मान्नायं दोषावहः। तथापि सर्वेषां भाष्यपाठभेदानां समीचीनत्वाङ्गीकारे, तदनुसारेण सूत्रपाठेऽपि तथात्वप्रसङ्गेन तत्परिहाराय कः पाठः युक्ततर इति विचारणीयं विद्वद्भिः। यदि च सूत्रेषु पाठभेदास्सत्या इत्यङ्गीक्रियते तर्हि अद्वैतिनाम्, विशिष्टाद्वैतिनां चोपरि अपपाठकल्पनादिदोषापादनम्, आनन्दतीर्थभगवत्पादानां टीकाकाराणां च अयुक्तं स्यात्, तथा च तथैव गीतादिष्वपि पाठभेदानां समीचीनत्वाङ्गीकारे तत्रापि दोषापादनं न युज्यते इति अवश्यविचारणीयता अस्य।

अत्रेदं विचारणीयम्। क्वचिदपि काले आचार्यहस्तलिखिता मातृका नावस्थानमलभत। प्रायश्शिष्यहस्तैरेव तैर्लेखितमिति मध्वविजयादवगम्यते[१५]। तत्र 'सत्यतीर्थ इह भाष्यमालिखत्' इत्युक्ता मातृकैव अतिप्राचीना इति निश्चप्रचमपि इदानीं तस्याः स्थितिः का इति केनापि न ज्ञायते। परन्तु पलिमारुमठे हृषीकेशतीर्थलिखितत्वेन परंपराप्राप्ता मातृका सुरक्षिततया[१६] पूज्यते, यां चोपयुयुञ्जिरे गोविन्दाचार्याः। उत्तरादिमठेऽपि पूजार्थमुपयुक्ता अतीव प्राचीना एका मातृका वर्तते, या च आचार्यैः पद्मनाभतीर्थानां सकाशे दत्ता, परन्तु निरन्तरसंचारेण तस्याः अतीव अन्तिमा दशा दृश्यते, कानिचन चूर्णान्येव दृश्यन्ते, नैव च पठितुं शक्यते इति इदानींतनोत्तरादिमठाधीशैः सत्यात्मतीर्थैः मम सकाशे उक्तम्। उडुपीनगरे अष्टसु मठेषु प्राचीनाः बहवः मातृकाः संरक्षिताः वर्तन्ते। परन्तु कियती तेषां प्राचीनता इति विचारणीयम्। एतासां साहाय्येन पाठनिर्धारणं शक्यते।

तथापि पाठभेदनिर्धारणे अतीवोपयुक्ताः व्याख्या एव। तत्र भाष्यपाठनिर्धारणे तत्त्वप्रदीपिका[१७], पद्मनाभतीर्थविरचित्वेन प्रख्याता सत्तर्कदीपावळी, तत्त्वप्रकाशिका, तस्याः टिप्पण्यः,

---

[१३] 'युक्तेश्च' इति सूत्रं ज.पाठे 'ज्ञोऽत एव' इत्यधिकरणे वर्तते (२-३-१०-१८), परन्तु हृ.पाठे नास्ति, तद्वाक्यं भाष्यत्वेन पठ्यते (द्र० गो.टि. पृ.९७)। तथा 'दर्शनात्' इति प्र.पाठः (३-२-१७-३३), 'दर्शनात्तु' इति हृ.पाठः। 'आप्रायणात्' इति प्र.पाठः (४-१-७-१२), 'आप्रयाणात्' इति हृ.पाठः इत्यादि परिशिष्टे द्रष्टव्यम्।

[१४] अनुव्याख्याने 'द्वौ भूतसर्गौ भूपात्र' इति नयाचन्द्रिकापाठः, 'द्विविधो भूतसर्गोऽत्र' इति अन्येषां पाठः। द्र० गो.टिप्पणी भाष्यपुस्तके पृ.१८२।

[१५] 'सत्यतीर्थ इह भाष्यमालिखत्' (९-१३), 'चतुरश्चतुरशिशष्यान् लीलयाऽलेखयत्खलु' (१५-८९), 'स्थैर्यार्थं सपदि स लेखयांबभूव' (१६-४५)इति मध्वविजये। प्रायः आचार्यकाले एव भाष्यस्य बह्व्यः मातृकाः तैस्तैर्विद्वद्भिः उपायुज्यन्त इति 'क्षणदासु विचक्षणस्स वीक्ष्य प्रचुरप्रज्ञमनोज्ञशास्त्रसारम्' (१३-६७) इत्यादिमध्वविजयादवगम्यते।

[१६] परन्तु तस्याः तालपत्रमय्याः मातृकायाः इदानींतनपद्धत्यनुसारं संरक्षणार्थं तैलादिलेपनेन इदानीं स्थितिः अतीव क्षीणा वर्तते इति कर्णपरंपरया ज्ञायते।

[१७] एते पद्मनाभतीर्थाः आचार्याणां साक्षाच्छिष्याः सन्न्यायरत्नावळी-सत्तर्कदीपावळीति ग्रन्थद्वयकर्तारः। तत्त्वप्रदीपिकाराः त्रिविक्रमपण्डिताचार्या आचार्याणां साक्षाच्छिष्याः। नयचन्द्रिकाकर्तारः नारायणपण्डिताचार्याः आचार्याणां साक्षाच्छिष्यत्रिविक्रमपण्डिताचार्यशिष्याः। नयचन्द्रिकायां नारायणपण्डिताचार्यैः 'सन्न्यायरत्नावलयः सन्नयामृतबिन्दवः। श्रीमत्तत्त्वप्रदीपाश्च सन्तु नश्शरणप्रदाः।।' इति उल्लिखितः सन्नयामृतबिन्दुपदोक्तः ग्रन्थः कः इति न ज्ञायते। या कापि प्राचीनटीका स्याद्वा। अथ वा लिकुचशंकराचार्यकृता न्यायविवरणसंबन्धदीपिका तथोक्ता स्यात्।

वेदगर्भनारायणाचार्यकृतभाष्यार्थमञ्जरी च अत्र उपयोक्तुं शक्यन्ते। अनुव्याख्यानपाठनिर्धारणे च सन्न्यायरत्नावळी, नयचन्द्रिका, सुधा, सुधाटिप्पण्यश्च उपयुज्यन्ते। तथा इदानीं शतद्वयवर्षप्राक्कालिकी जगन्नाथतीर्थविरचिता भाष्यदीपिका अपि बहून् पाठभेदानुल्लिखन्ती तन्निर्धारणे साहाय्यकमाचरेत्।

अत्र सुधादृतपाठः **सु.पाठः**, जयतीर्थादृतपाठः **ज.पाठः**, हृषीकेशतीर्थादृतः पाठः **हृ.पाठः**, वेदगर्भनारायणाचार्यादृतः **वे.पाठः**, प्रभञ्जनाचार्यप्रकाशितपुस्तकस्थः अक्षोभ्यतीर्थीयत्वेनोक्तः पाठस्तु वस्तुतः रामचन्द्रतीर्थीयत्वात् **रा.पाठः**, कुम्भकोणनगरमुद्रितसर्वमूलपुस्तकानुसारिभाष्यपाठः अनुव्याख्यानपाठश्च **प्र.पाठः** इति चिह्निताः।

अत्र च गोविन्दाचार्यैः प्रायः त्रिंशद्वर्षाणि निरन्तरमिदमेव शृणुमो यद् प्रचलितपाठः सुधादृतपाठश्च बहुदोषयुक्तत्वात् अग्राह्यः, किन्तु प्राचीनमातृकानुसारी तत्त्वप्रदीपानुसारी च हृ.पाठ एव स्वीकार्य इति। सत्यमेव प्र.पाठे बहुदोषास्सन्तीति, ये च कालक्रमेण सर्वत्रापि मातृकापरम्परायाम् अवश्यभाविनः, ये च दोषाः सूक्ष्मतया टीका-टिप्पण्यादिदर्शिभिः विद्वद्भिः परिहर्तुं शक्यन्ते एव। परन्तु सर्वेषामपपाठानां मार्जने न क्षमाः टीकाः टिप्पण्यश्च, प्रायष्टिप्पणीनां टीकाव्याख्यानपरत्वात्, टीकानां च सुधादीनां प्रतिपदव्याख्यानरूपत्वाभावात्। वेदगर्भीया टीकैव प्रतिपदव्याख्यारूपा वर्तते इति कृत्वा सात्रोपयुज्यते। परन्तु हृषीकेशतीर्थीयपाठस्य कियता अंशेन ग्राह्यत्वमित्यत्रैव विप्रतिपत्तिः। अनेकत्र तत्त्वप्रदीपिकादृतपाठापेक्षया भिन्नत्वात्[१८], बहुत्र जयतीर्थीयटीकादृतपाठापेक्षया भिन्नत्वात्। जयतीर्थैः अष्टादशानाम् आचार्यकृतग्रन्थानां टीकाः रचिताः। तत्र तैः कीदृशः पाठ आदृतः सः न त्यक्तुं शक्यते, स अवश्यं मूलपाठत्वेनैव स्वीक्रियते। अन्येषां ग्रन्थानां विषये अस्तु वा हृ.पाठस्यादरः, कथमत्र, यत्र प्राचीनमूलकोशाधृतजयतीर्थीयटीकाव्याख्यानसंप्रदायः जागरूकः।

तत्र सूक्ष्मतया विचार्यमाणे सति, सूत्रभाष्ये दृश्यमानाः पाठाः केचन हृ.पाठानुवर्तिनः दृश्यन्ते, तथापि न सर्वांशेन हृ.पाठानुवर्ती प्र.पाठः। यतः सूत्रभाष्ये तत्त्वप्रकाशिकायाः प्रतिपदव्याख्यारूपत्वाभावात् बहुत्र टीकादृतः पाठः क इति न निश्चीयते। परन्तु अनुव्याख्याने सुधायाः प्रतिपदव्याख्यारूपत्वात् तत्र अनुव्याख्यानपाठः कः इति प्रायः सर्वत्र ज्ञायते एव। तत्र गोविन्दाचार्यैः यत्र यत्र अनुव्याख्याने प्र.पाठस्य हृ.पाठस्य च वैलक्षण्यं वर्तते अत्र तत्सर्वं निर्दिष्टम्। तेषां स्थलानां, तत्र सुधादृतपाठस्य च परीक्षणे सुधासंमताः हृ.पाठाः प्रतिशतम् अष्टादशैव भवन्ति। अन्यत्र प्रतिशतं विंशतिस्थलेषु न निर्णेतुं शक्यते, अन्यत्र च प्रतिशतम् अष्टषष्टिस्थलेषु सुधायाः पाठाः हृ.पाठापेक्षया भिन्नाः दृश्यन्ते[१९]। तथैव सूत्रभाष्येऽपि अनेकत्र तत्त्वप्रकाशिकादृतपाठाः हृ.पाठापेक्षया भिन्नाः दृश्यन्ते। तस्मात् 'तदनेन येऽत्र एतादृशपाठभेदा उल्लिखिताः हृषीकेशतीर्थजयतीर्थयोः, हृषीकेशतीर्थ-पण्डिताचार्ययोर्वा, वस्तुतस्तत्र पाठभेद एव नास्ति, स्वकपोलकल्पितबालिशतर्कमूलोऽयं भेद इति सर्वे व्याख्याता व्याख्याता' इति गोविन्दाचार्यवचनं[२०] विद्वदुपेक्षामर्हति इति अतिरोहितमेव एतत्पठितॄणाम्।

किंच जयतीर्थैः आचार्यरचितेषु विभिन्नेषु ग्रन्थेषु प्रायः पञ्चदशसु स्थलेषु पाठभेदाः निर्दिष्टाः। यत्र च पाठभेदाः सन्ति ते तैरुल्लिखिताः। ते च समग्रे अनुव्याख्याने षट्, गीताभाष्ये पञ्च, गीतातात्पर्ये एकः, विष्णुतत्त्वनिर्णये एकः, प्रमाणलक्षणे एकः, इति केवलं पञ्चदशैव[२१]। एतेन संशीयते केवलं जयतीर्थकाले तावन्त एव पाठभेदाः आसन्, कालक्रमेण च परिवृद्धा इति। जयतीर्थैः अनुव्याख्यानादौ अल्पतरा अपि

सुधाकर्तारस्तु अक्षोभ्यतीर्थशिष्याः तत्त्वप्रकाशिकाकर्तारश्च। वेदगर्भनारायणाचार्यास्तु रघूत्तमतीर्थपरमगुरुरघुनाथतीर्थानां शिष्याः प्रायः सार्धचतुश्शतवर्षप्राक्कालिकाः।

[१८] तत्संख्याः भाष्ये प्रथमाध्यायप्रथमपादे दर्शिताः अत्र। अनुव्याख्याने सर्वे अपि सुधाविरुद्धाः पाठाः प्रदर्शिताः परिशिष्टे।

[१९] द्र० परिशिष्टम्। अनुव्याख्याने आहत्य २८० हृ.पाठभिन्नेषु प्र.पाठेषु सुधासंमतपाठाः ५०, अनिर्णीताः पाठाः ८५, प्रायः अन्ये पाठाः केवलं पदयोः पूर्वापरीभावादयः, च-तु-हि-शब्दभेदाः इत्यादिरेव।

[२०] एतस्य निबन्धस्य विषये तैः लिखिते पत्रे।

[२१] द्र० परिशिष्टे।

पाठभेदा उल्लिखिताः। यदि च इतोऽप्यधिकतया तत्र पाठभेदा अभविष्यन् नूनमेव तैः उदलिखिष्यन्त। नोल्लिखिताः, तस्मान्नासन्निति। तत्र च आहत्य पञ्चदशपाठेषु नव पाठाः ह.पाठे दृश्यन्ते।

किंच अनेकत्र ह.पाठस्यायुक्तता वर्तते इति स्वयं गोविन्दाचार्यैः[२२], तथा हयवदन-पुराणिकमहाशयैः[२३], बाळगारु रुचिराचार्यैश्च[२४] प्रदर्शितम्। किंच हृषीकेशतीर्थीयेऽपि कानिचन पत्राणि गलितानि[२५]। गीताभाष्यादीनि च नोपलब्धानि। तत्र तैः अन्यमातृकाधारेण पाठनिर्णयः कृतः। तत्र कथं मूलपाठनिर्णयः इति विचारणीयम्।

तथा अनेकत्र ह.पाठे भिन्नपाठता दृश्यते। 'प्रमाणं निर्णयाय स्युः' इति अनुव्याख्याने पठितमेव वाक्यं 'प्रमाणनिर्णयाय स्युः' इति कथालक्षणे पठ्यते। तथा 'आदध्मासः' इति अनुव्याख्याने (पृ.१७६), 'आदग्ध्मासः' इति पठ्यते बृहद्भाष्ये (पृ.२६५)। वकार-बकारयोश्चायं भेदः स्फुटतरः, 'हरेरनुव्रताः' इत्यनुव्याख्याने (पृ.२०४), 'हरेरनुब्रताः' इति बृहद्भाष्ये (पृ.२६०), छान्दोग्यभाष्ये च (पृ.३४१)। अत एव वकार-बकारयोः भेदोऽत्र न परिगणितः, यथा 'बाह्यं बाहकमित्यपि' इति अनुव्याख्याने (पृ.९), तथा लकार-ळकारयोरपि, मात्रयापि अर्थभेदाकरणात्।

किंच अत्र प्रदर्शयिष्यमाणरीत्या प्रायः अनेकत्र स्थलेषु ह.पाठः तत्त्वप्रदीपादृतपाठापेक्षया भिन्नो वर्तते, ततोऽप्यधिकस्थले जयतीर्थादृतपाठापेक्षया भिद्यते इति यत्र प्राचीनटीकासाहाय्येन तदादृतपाठो निश्चेतुं शक्यते, तत्र प्राचीनमूलकोशाधृतटीकादृतपाठभिन्नत्वात् टीकानुयायिनां जयतीर्थादृतपाठ एव ग्राह्यः। यत्र तु प्र.पाठे अयुक्तता वर्तते इति निश्चितं भवेत्, तत्र प्र.पाठत्यागस्यावश्यकत्वेऽपि अन्यत्र ह.पाठ एव मूलपाठ इत्युद्घोषणं निरर्थकमेव, जयतीर्थादृतपाठस्यापि मूलकोशाधृतत्वेन मूलपाठत्वात्।

तत्र तत्त्वप्रकाशिका तत्त्वप्रदीपिकानुवर्तिनी स्थलद्वये त्रिविक्रमपण्डिताचार्यान् संप्रदायवित्त्वेन उल्लिखति। यथा 'अत एव प्राणः' इति सूत्रे, 'धृतेश्च महिम्नः...' इति च सूत्रे[२६]। तत्र च तत्त्वप्रदीपिकां विहाय अन्यः व्याख्यासंप्रदायः नास्ति सूत्रभाष्ये, पद्मनाभतीर्थीयग्रन्थस्य संदेहग्रस्तत्वात्। तस्मात् तत्त्वप्रकाशिकायाः तत्त्वप्रदीपिकापूरकत्वेन तदनुकूलत्वात् प्रायः तदीयविषयाः तत्त्वप्रदीपस्थाननुकुर्वन्ति। अत एव यत्र तत्त्वप्रकाशिका दीर्घं भाष्यस्थं श्रुतिवाक्यमुपादत्ते तद्वाक्यं श्रुतिस्थत्वेन तत्त्वप्रदीपानुमतमेवेति अनुमीयते[२७]।

---

[२२] द्र० सूत्रभाष्ये गोविन्दाचार्यटिप्पणी। तत्र तत्र मूलकोशे खलनसंभावना दर्शिता। यथा पृ. ७, १०,२२,३८,५४,७७,१०४,१२९,१३५, १५२,१६०,१६२,१६४,१७४,१७६,१८०,२१४,२१५,२१७,२२२,२२५,२२७।

[२३] द्र० हयवदनपुराणिकानाम् अप्रकाशितं पत्रम् एतद्विषयं। तैः बहुत्र स्थलेषु कथं ह.पाठोऽयुक्त इति कर्मनिर्णयादिषु दर्शितम्।

[२४] द्र० गीताभाष्ये प्रमेयदीपिकासहिते तत्प्रकाशिते (२००२) पृ. ४८५-६।

[२५] हृषीकेशतीर्थीये कुत्र कुत्र पत्रं गलितमिति स्पष्टतया न ज्ञायते। तथापि गो.टिप्पणीभिः क्वचित् स्थलेषु तथा ज्ञायते। यथा सू.भाष्ये १३५, १६२, १९१,२२७ एतेषु पृष्ठेषु।

[२६] ब्र.सू.१-१-९-२२, १-३-५-१६।

[२७] तत्र तत्त्वप्रकाशिकायाः तत्त्वप्रदीपस्य च क्वचित्स्थले विरोधाभासपरिहारस्तु एवम् — यथा 'अत एव प्राणः' इत्यत्र श्री-लक्ष्मीभेदनिरूपणप्रसङ्गे टीकायां 'वक्षःस्थलाश्रिता श्रीः इति संप्रदायविदः' इत्युक्तेऽपि तत्र तत्त्वप्रदीपानुरोधेन 'वक्षसि लक्षणभूता लक्ष्मीः, अङ्काश्रिता श्रीरिति संप्रदायविदः' इति भाव्यम्, अन्यथा टीकावाक्यस्यैव अपूर्णत्वापत्तिः। श्री-लक्ष्म्योः भेदस्य वक्तुमुद्यतटीकायां केवलं श्रिय एव स्वरूपकथनात्। तत्र उल्लिखितसंप्रदायविदोऽपि तत्त्वप्रदीपकारा एवेति च स्पष्टम्। तस्मात् नास्ति तत्त्वप्रदीप-तत्त्वप्रकाशिकयोर्विरोध इति विभावनीयम्। परन्तु सर्वत्र व्याख्यासु 'वक्षःस्थलाश्रिता श्रीः इति संप्रदायविदः' इति वाक्यस्यैव व्याख्यानं वर्तते। तदेतत् विचारणीयं पुरतः।

एवं स्थितौ तत्त्वप्रदीपतत्त्वप्रकाशिकयोरवलोकनेन बहुत्र भाष्योदाहृतश्रुतिवाक्यानि दीर्घाणि दृश्यन्ते, यानि ह.पाठे ह्रस्वानि दृश्यन्ते। तत्त्वप्रकाशिकायां दीर्घस्य पाठस्य व्याख्यानं यथा 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति प्र.पाठः। ह.पाठे तु 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्' इतिपर्यन्तमेव पठ्यते। उत्तरः सर्वोऽपि भागो न पठ्यते। अत्र तत्त्वप्रकाशिकायां 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति पर्यन्तमपि श्रुतिः व्याख्याता, समित्पाणिः इत्यादिश्चोत्तरभागो न व्याख्यातः। 'नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति श्रुतिभागस्य व्याख्यानरूपा त.प्र.एवम् - 'स च मोक्षादितरत्र निर्विण्णो विज्ञानार्थं गुरुमेवाभिगच्छेत्। यस्मान्नित्यपुमर्थो मोक्षः कर्मादिना न सिध्यति तस्मादित्यर्थः। अत्रापि विज्ञानपदेनोत्तमाधिकारित्वं सूचितम्' इति। अत्र च टीकायां स्पष्टतया

तस्मात् जयतीर्थादृतः मूलपाठः, तदीयमूलकोशश्च अन्य एव, ह.पाठस्तु तेषां न मूलपाठः इति निर्णीयते। ह.पाठोऽपि साक्षादाचार्यशिष्यलिखितत्वात् प्रमाणमेव। तथापि न सः जयतीर्थानां संमतः पाठः इति परिशिष्टावलोकनेन स्पष्टम्। तत्र ह.पाठ-ज.पाठयोः तादृशपाठभेदानां कारणम् आचार्यैरेव कालान्तरे अन्यथा अन्यथा प्रसङ्गानुसारेण व्याख्यानमेव भवेत्। सर्वथा न तेषामर्थभेदकारणता। ये च अर्थभेदकारिणः पाठभेदाः सूत्रेषु वा भाष्ये वा तेषां तु निर्णयः कर्तुं शक्यते एव।

ज.पाठ-ह.पाठयोः विप्रतिपत्तिस्थानानि कानिचनैव भवन्ति। यथा अनुव्याख्याने आहत्य २८० ह.पाठभिन्नेषु प्र.पाठेषु सुधासंमतपाठाः ५०, अनिर्णीताः पाठाः ८५, प्रायः अन्ये १४५ पाठाः केवलं पदयोः पूर्वापरीभावादयः, च-तु-हि-शब्दभेदाः इत्यादिरेव। तस्मात् वस्तुतः तत्र सु.पाठ-ह.पाठयोर्विरोधो नास्ति। केवलं क्वचित् सूत्रपाठे, अन्यत्र च क्वचित् विरोधो वर्तते। तत्र विरोधशान्तिप्रकारः एवं चिन्त्यते। तद्यथा —

'भेद एव गवाश्वयोः'

'ऐक्यप्रतीत्यभावेन भेद एव गवाश्वयोः' इति अनुव्याख्याने प्र.पाठः। अत्र च सुधायाः मुद्रितपाठे एवम् - 'गवश्वयोरिति प्रमादपाठः। मूलकोशेष्वदर्शनात्' इति।

अत्र च <u>शेषवाक्यार्थचन्द्रिकानाम्नी सुधाव्याख्या</u> एवम् — **गवाश्वयोरिति**। न च 'गवाश्वप्रभृतीनि' च इति सूत्रे 'प्रभृतीनि' इति शब्दरूपापेक्षनपुंसकनिर्देशानुरोधेन गणपाठे यादृशानि शब्दरूपाणि पठितानि तादृशानां साधुत्वमात्रस्यात्र विधानात् गणे च गवाश्वप्रभृतीनां शब्दरूपाणां कृतावङादेशानां कृतैकवद्भावानामेव च पठितत्वेन गवाश्वमित्येव भाष्यतट्टीकयोर्वक्तव्यत्वात् गवाश्वयोरित्यकृतैकवद्भावप्रयोगः कथमिति वाच्यम्। गणपाठे पठितशब्दरूपाणां कृतैकवद्भावत्वस्य प्रायिकत्वेन, कृतावङादेशत्ववत्तस्यानियततया तथाप्रयोगसंभवात्। अत एव 'अथासत्यपि सामान्ये

भाष्योदाहृता श्रुतिर्गाङ्गः व्याख्याता दृश्यते। तदुत्तरश्च 'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति भागः टीकायां न व्याख्यातः इति स नास्ति भाष्ये, परन्तु 'अत्रापि विज्ञानपदेनोत्तमाधिकारित्वं सूचितम्' इति टीकया 'विज्ञानार्थम्' इत्यादिपदानि भाष्ये वर्तन्ते इति तु स्पष्टमेव। यतः 'अत्रात्मनीत्युक्त्या मध्यमाधिकारित्वं सूचितम्' इति पूर्वटीकायां भाष्यस्थात्मनिपदेन मध्यमाधिकारित्वसूचनस्य पूर्वत्र व्याख्याततया, तत्सहपठितताया एतट्टीकाया अपि भाष्यस्थ'विज्ञानार्थम्'इति पदव्याख्यानरूपताया वाच्यत्वात्। तदेवं पूर्णा श्रुतिः ह.पाठे नास्ति, ज.पाठे तु वर्तते।

भाष्येऽविद्यमानमपि पदं प्रकृतार्थसमर्थनाय टीकायां व्याख्यातम् इति गोविन्दाचार्यपक्षस्तु 'अत्रापि विज्ञानपदेनोत्तमाधिकारित्वं सूचितम्' इति टीकया अपहस्तितः। न हि भाष्येऽपठितेन विज्ञानपदेनोत्तमाधिकारित्वं सूचयितुं शक्यते। 'आत्मनीत्युक्त्या' इति पूर्वटीकाया इव अत्रापि भाष्यस्थविज्ञानपदेन तत्सूचितम् इत्येव तदर्थः ग्राह्यः इति पूर्वमेवोक्तत्वात्। भाष्येऽपठितेनापि श्रुतिस्थेन तत्सूचनं चेत् बहवोऽर्थाः भाष्येऽपठितैः श्रुतिस्थैः पदैः सूचिता भवेयुः, किं विज्ञानपदेन उत्तमाधिकारित्वमात्रम् इत्यादिप्रश्नसमाधानाक्षमतया परास्तम्।

तत्त्वप्रदीप-ह.पाठयोः पाठभेद एव नास्तीति गोविन्दाचार्यवचनं तु भेदाभावप्रदर्शनेन विना साहसिकम्। स्पष्टतया व्याख्यायन्ते वचनानि तत्त्वप्रदीपे, न तानि भाष्यस्थानि किन्तु प्रकृतार्थसमर्थनाय तत्त्वप्रदीपकारैरेव व्याख्यातानि इति वचनस्य नास्त्यूहं विना अन्यन्मूलम्।

अथ चिन्त्यते। 'स्वाप्ययात्' इति सूत्रे 'पूर्णमदः पूर्णमिदम्' इत्येव ह.पाठः। समग्रः श्लोकस्तु तत्त्वप्रकाशिकायां तत्त्वप्रदीपे च व्याख्यातः। तथापि नायं तत्त्वप्रदीपसंमतः पाठः। यदि संपूर्णं वाक्यं भाष्ये उदाहृतं भवेत् तर्हि तत्त्वप्रदीपे पुनः तस्य समग्रश्लोकस्य पठनं व्यर्थमापद्येत इति। तस्मात् भाष्ये आदिभाग एवोपात्तः, तत्त्वप्रदीपे तु व्याख्यासौकर्यायैव समग्रोऽपि भागो उपात्तः, व्याख्यातश्च। तस्मात् तत्त्वप्रदीप-ह.पाठयोः पाठभेद एव नास्तीति।

तत्रेदं प्रतिचिन्त्यते। यदि 'पूर्णमदः पूर्णमिदम्' इत्येतावदेव भाष्यम्, न तु पूर्णं, तदा भाष्यस्य उद्देश्यमेव न सिध्येत्। 'स्वाप्ययात्' इति सूत्रव्याख्यानाय खलु प्रवृत्तमिदं भाष्यं स्वाप्ययप्रदर्शनाय 'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' इति श्रुतिवचनं यदि नोपादद्यात् तर्हि व्यर्थमेव भविष्यति। अयं चाचार्यक्रमः सर्वत्रापि दृश्यते, यः यद्यपि लघु भाष्यम्, तथापि यावत्प्रतिपादयितुमिष्टं तत्प्रतिपादनाय तावन्तं श्रुतिभागमुपादत्ते इति। तत्त्वप्रदीपे तु भाष्योपात्तस्यापि श्रुतिभागस्य पुनरुपादानम् अनेकत्र दृश्यते। यथा 'अतश्चायनेऽपि दक्षिणे' इति सूत्रे (४-२-९-२१) भाष्ये उपात्तोऽपि 'महर्लोकादिगन्तारः' इति श्लोकः पुनः पठितः। तथा 'तन्निर्धारणार्थनियमस्तद्दृष्टेः...' इति सूत्रे (३-३-२५-४३) 'श्रुत्वा मत्वा' इत्यादिब्रह्मतर्कवचनं च। तस्मात् तत्त्वप्रदीपशैली एव सा इति निश्चयेन नानेन तस्य भाष्यस्थत्वबाधः।

रयादपोहस्य कल्पना। गवाश्वयोरयं कस्मादपोहो न कल्प्यते।।'[२८]
इत्यपोहवादस्थश्लोकवार्तिकस्थप्रयोगस्तट्टीकाकृता तस्य प्रायिकत्वाभ्युपगमेन समाहितः इति द्रष्टव्यम्[२९]।

अत्र **ह.पाठे** 'ऐक्यप्रतीत्यभावेन भेद एव गवश्वयोः' इति पाठः। अत्र च पादटिप्पण्यां गोविन्दाचार्यैः एवं लिखितम् — यद्यपि सुधायां 'गवश्वयोरिति प्रमादपाठः। मूलकोशेष्वदर्शनात्' इति पठ्यते। तदनुसारेण च 'गवाश्वयोः' इत्येव मूलपाठ इति प्रतीयते। किन्तु श्रीहृषीकेशतीर्थीये मूलकोशे अधोक्षजतीर्थीयसंप्रदायानुसारिणि पेजावरमठीये प्रतनतरे च मूलकोशे, तदन्येषु च सर्वेषु कोशेषु 'गवश्वयोः' इत्येव पठ्यते। न क्वापि 'गवाश्वयोः' इति। तेन चायमेव मूलपाठ इति निश्चीयते। तदनुसारेण च - 'गवाश्वयोरिति प्रमादपाठः। मूलकोशेष्वदर्शनात्' इत्येव सुधापाठः संभाव्यते। क्वचिच्च मुद्रिते पुस्तके तथैव पाठो दृश्यते।

ननु तर्हि कथं 'गवश्वयोः' इति। 'गवाश्वप्रभृतीनि' इति किल पाणिनिरभाणीत्। मैवम्। नायं 'गवाश्वप्रभृतीनि' इति सूत्रस्य विषयः यद् 'गवाश्वयोः' इति। यतस्तत्रैकवद्भावोऽभिमतः। तथा हि पतञ्जलिः- 'गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं द्रष्टव्यम्। गवाश्वम्, गवाविकम्, गवैडकम्' इति। कैयटोऽप्याह - 'गणे यादृशाः पठितास्तादृशानामेवेदं कार्यमेकवद्भावलक्षणं भवति' इति, 'एतेन गणपाठरूपं विवक्षितमित्युक्तं भवति' इति च। यदि चात्र विभाषा स्यात् तदा 'अवङ् स्फोटायनस्य' इत्यनेनैव रूपसिद्धौ 'गवाश्वप्रभृतीनि' इति पुनर्योगकरणमेव व्यर्थं स्यात्। तेन पाणिनिमतानुसारेण 'गवाश्वयोः' इति द्विवचनं दुरुपपादमेव।

नन्वस्तु। तावता 'गवश्वयोः' इति कथम्?। गवय इति यथा तथा तद्वत् सेत्स्यति। गां सादृश्येनायते इति हि नैरुक्ताः निर्वदन्ति। गामञ्चतीति गवाचि इत्यपि। 'एङः पदान्तादति' इति पूर्वरूपमपोद्य यथा तत्राव् भवति तद्वदत्रापि।

ननु का गमनिका। व्याकरणान्तरमिति ब्रूमः। तथा हि सारस्वतं व्याकरणम् - 'गवादेरवर्णागमोऽक्षादौ वक्तव्यः। गवाक्षश्च गवेन्द्रश्च गवाग्रं च गवाजिनम्। स्वैरमक्षौहिणी प्रौढ एते प्रोक्ता गवादयः।।' इति। एतेन ज्ञायतेऽक्षेन्द्राग्राजिनेष्वेव अवर्णागमो भवति, नाश्वादाविति। तेनैतद्रीत्या 'गवश्वयोः' इत्येव भवति, न 'गवाश्वयोः' इति। अक्षौहिणी इत्यत्राप्यवर्णागममनभ्यनुजानता भगवता आचार्येण तात्पर्यनिर्णयादौ सर्वत्र अक्षोहिणी इत्येवासकृत् प्रायुज्यत इत्यप्यत्र स्मर्तव्यम् — इति गोविन्दाचार्यैः प्रतिपादितम्।

---

[२८] श्लो.वा.अपोहवादे श्लो.७६। परन्तु इदानीम् मुद्रितव्याख्यासु (न्यायरत्नाकरे शर्करिकायां च) तादृशं समर्थनं नोपलभ्यते। काशिकायां तथा समर्थनाभावेऽपि द्विवारं गवाश्वयोः इति शब्दप्रयोगो दृश्यते (श्लो.६९,७६ अडयारस्थमातृकायाः मम सकाशे विद्यमानप्रतिकृतौ)।

[२९] श.वा.चन्द्रिकायाः शेषस्त्वेवम् — यद्वा गौश्चाश्वश्च इति गवाश्वशब्दद्वन्द्वस्य कृतावङादेशस्य कृतैकवद्भावस्य साधुताया अनेन विधानात् तादृशद्वन्द्वगाक्षे गवाश्वयोरित्यस्यानुपपत्तिप्रसक्तावपि गवाश्वं च गवाश्वं च गवाश्वे इति गवाश्वशब्दद्वन्द्वस्य अनेन तथाऽसाधुत्वाविधानात् घटयोरितिवत् गवाश्वयोरिति निर्देशस्योपपन्नत्वात्। गवाश्वयोरिति पाठस्य प्रमादपतितत्वे युक्तिमाह- **मूलकोशेष्विति**। उपलक्षणं चैतत्। 'अवङ् स्फोटायनस्य' इति यदा अवङ् न प्रवर्तते, तदा 'एङः पदान्तादति' इति पूर्वरूपप्रसङ्गेन पशुद्वन्द्वविभाषया गोऽश्वस्य गोऽश्वयोः इत्येव, 'सर्वत्र विभाषा गोः' इति प्रकृतिभावपक्षे गोअश्वस्य, गोअश्वयोः इत्येव प्रयोगप्रसङ्गेन अवादेशमाश्रित्य तथा पाठस्यासंभवदुक्तिकत्वादित्यपि द्रष्टव्यम्। — इति व्याख्यातम्।

<u>श्रीनिवासतीर्थीयनाम्नि सुधाव्याख्याने</u> — ननु कथं प्रामादिकत्वम्। गो अश्व इति स्थिते ओकारस्यावादेशे गव् अश्व गवश्व इति भविष्यतीति चेत् सत्यम्। विशेषविधानपर्यालोचनया एतत्पाठस्य प्रामादिकत्वम्। तथा हि 'अवङ् स्फोटायनस्य' (अचि परे गोः अवङ् वा स्यात्) गो अग्रं गवाग्रम् इति दर्शनात्। प्रकृतेऽपि गो अश्व इति स्थिते अचि परे गोरवङादेशे ङकारलोपे गव अश्व इति जाते अकः सवर्णदीर्घे 'गवाश्व' इति रूपसिद्धिः। न च गोः अवङादेशस्य विकल्पविधानात् गवश्वमित्यपि भविष्यतीति कथं प्रामादिकत्वमिति वाच्यम्। स्वमते विकल्पत्वेऽपि स्फोटायनमते तु तस्य नित्यत्वमेवेति न दोषः — इति व्याख्यातम्।

<u>परिमळनाम्नि सुधाव्याख्याने</u> एवम् — यथाश्रुतमूलानुवादेन वा गवाश्वप्रभृतीनि च इत्येकवद्भावमनाश्रित्य (वा?) गवाश्वयोरित्युक्तम्। मूले तु व्यत्ययो बहुलम् इति समाधिः प्रागुक्तो ज्ञेय इति भावः — इति व्याख्यातम्।

परन्तु तत्र समीचीनम्। तथा हि सारस्वतव्याकरणरीत्यापि 'गवाश्वौ' इत्येव रूपम्। तत्रैतत्कारणम्- 'इतरेतरयोगे द्विवचनम्' इति सारस्वतं वचनम् (का.सं.सी.पृ.२४९)। तथा अन्यत्रापि सारस्वते 'यत्र द्वित्वं बहुत्वं च स द्वन्द्व इतरेतरः। समाहारः स विज्ञेयः यत्रैकत्वं नपुंसकम्।।' इति (ह.सं.सी.पृ.८०)। तस्मात् यत्र समाहारद्वन्द्वः तत्रैव एकवद्भावो भवति। यत्र तु इतरेतरद्वन्द्वः तत्र द्वित्वं वा बहुत्वं वा अभिमतम्। अत्र च 'गवाश्वयोः' इत्यस्य इतरेतरयोगद्वन्द्वत्वात् द्विवचनमेव सारस्वतव्याकरणरीत्या। पाणिनिरीत्यापि अत्र द्विवचनमेवेति उपरिष्टाद्वर्तमानश्रीवत्साङ्काचार्यलेखेन ज्ञायते।

किंच सारस्वतव्याकरणे यद्यपि 'गवादेरवर्णागमोऽक्षादौ वक्तव्यः। गवाक्षश्च गवेन्द्रश्च गवाग्रं च गवाजिनम्। स्वैरमक्षौहिणी प्रौढ एते प्रोक्ता गवादयः।।' इत्युक्तं, तथापि गवाक्षादिपदानामुपसंख्यानत्वात् गवाश्वपदेऽपि अवर्णागमो[30] भवत्येव। तथा हि तत्र प्रसादव्याख्या (का.सं.सी. पृ. ४३) — वस्तुतस्तु वक्तव्यत्वात् वाशब्दाद्वा गवाक्षः गवेन्द्रः इत्यत्र नित्यम्। गवेशः गवीशः इत्यत्र वा (विकल्पेन इत्यर्थः)। गोऽग्रं, गोऽजिनम् इत्यत्र न, किन्तु 'एदोतोऽतः' इति अवर्णलोपः। गोअग्रं, गोअजिनम् इति प्रकृतिभावोऽपि। प्रौढ इत्यत्र अवर्णागमस्य बहिरङ्गेणापि प्रथमं सन्धिविधानसामर्थ्यात् नित्यत्वाच्च। प्रौढः, प्रौढिः। भारौहः। स्वैरम्। स्वैरिणी। **अक्षौहिणीत्यादयः प्रयोगतोऽनुगन्तव्याः** — इति। तेन यद् गोविन्दाचार्यैरुक्तं सारस्वतव्याकरणे गवाग्रादिषु क्वचिदेव अवर्णागमः न तु गवाश्वादौ, तेन 'गवश्वयोः' इति रूपसिद्धिरिति तत् **सारस्वतव्याकरणानवगममूलकमिति** निश्चीयते[31]।

किं च अत्रैव वेंकटराजशर्मणां श्रीवत्साङ्काचार्याणां महाबलेश्वरभट्टानां च अभिप्रायः परिशिष्टे निवेशितः। तत्र च आद्यद्वये 'गवाश्वयोः' इति प्रयोगस्य साधुत्वं समर्थिता। अन्त्ये च यद्यपि नास्य साधुत्वं समर्थितं, तथापि आद्यद्वयप्रदर्शितरीत्या तत्साधुत्वं शक्यनिश्चयमेव। गोविन्दाचार्याशयविषये तु अन्त्येऽपि स्पष्टमेव।

तस्मात् वस्तुतः अनुव्याख्याने 'गवाश्वयोः' इत्येव पाठः, 'गवश्वयोः' इति तु पाठः प्रमादगलितः इति।

'क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्'

'क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्' (१-३-९-३५) इति प्र.पाठः। 'क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्' इति ह.पाठः। तत्त्वप्रदीपे तु सूत्रप्रतीकग्रहणे 'क्षत्रियत्वगतेः' इत्येव वर्तते। परन्तु ह.पाठेऽपि 'क्षत्रियत्वावगतेश्च' इति भाष्यवचनात् भवति सन्देहः। सूत्रानुसारिणा हि भाष्येण भाव्यम्। तत्त्वप्रकाशिकायां न स्पष्टम्।

'एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः'

'एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः' (२-१-४-१३) इति प्र.पाठः। एतेन 'शिष्टाऽपरिग्रहा अपि व्याख्याताः' इति ह.पाठः। अत्र मायावादिभिः 'शिष्टापरिग्रहाः' इति पाठमङ्गीकृत्य शिष्टैः अपरिग्रहः = न परिगृहीताः, इति व्याख्यानं कृतम्। तच्च अनुव्याख्याने सुधायां च निरस्तम्।

---

[30] अवर्णागमः इति न अवर्णरूप आगमः, किन्तु अवर्णस्य आगमः। स्वैरम् इत्यादिषु ऐकारागदर्शनात्। तथा गवाश्वयोः इत्यत्र अकारागमः।

[31] अत्र इदमवधेयम्। सारस्वतव्याकरणभूमिकायां यद्यपि तत् व्याकरणं क्रि.श.पञ्चमशताब्दीयेन अनुभूतिस्वरूपाचार्येण रचितमिति लिखितम्, तथापि तत्र मम संशय एव। अस्य च व्याकरणस्य संस्करणद्वयं वर्तते। प्रथमं काशीसंस्कृतसिरीस् १११, अपरं हरिदाससंस्कृतसिरीस् ४ इति। तत्राद्ये चन्द्रकीर्ति-प्रसादनामकं व्याख्याद्वयं मनोरमाटिप्पणी च न्यवेशयन्त। अपरस्मिन् तु लघुपुस्तके केवलं मूलं लघुटिप्पणी लघुहिन्दी अनुवादश्च वर्तते। द्वितीयपुस्तकावलोकनेन तु गवाक्षादिपदानामुपलक्षणता न ज्ञातुं शक्यते, तस्मात् तदवलोकनपूर्वकं गोविन्दाचार्याणामेतल्लेखनं स्यादिति मन्ये। परन्तु सारस्वतव्याकरणे 'प्राचुर्यविकारप्राधान्यादिषु मयट्प्रत्ययो भवति' इति अन्नमयादिशब्दानामाचार्य कृतव्याख्यासमर्थनं दृश्यते।

तत्र यदि 'शिष्टा अपरिग्रहाः' इत्येव सूत्रपाठः जयतीर्थाभिमतः स्यात् तदा 'शिष्टापरिग्रहाः' इत्यपपाठकल्पनं मायावादिनामुपरि आरोपितं भवेत्। न चैवम्। तस्मात् 'शिष्टाऽपरिग्रहाः' इत्येव सूत्रपाठः। तदर्थश्च शिष्टाः अपरिग्रहाश्च इति। अनया च परम्परया प्र.पाठः प्रारब्धो भवेत् इत्यनुमीयते।

'युक्तेश्च'

'युक्तेश्च' इति सूत्रं ज.पाठे 'ज्ञोऽत एव' इत्यधिकरणे सूत्रत्वेनोपात्तम् (२-३-१०-१८)। परन्तु ह.पाठे अन्यत्र कोशेषु च 'युक्तेश्च' इत्येतद्वाक्यं भाष्यत्वेन पठ्यते (द्र० गो.टि. पृ.९७)। तत्त्वप्रदीपिका चात्र बहुलं संवदते। '**अविनष्टा एवोत्पद्यन्ते**[32] इति विरुद्धमिति न मन्तव्यमित्याह - **युक्तेश्च** इति। तामेव युक्तिं प्रकटयत्युत्तरभाष्येण। **शरीरसंयोगापेक्षया उत्पत्तिर्युज्यत** इत्यर्थः' इति तदग्रन्थात्। तत्त्वप्रकाशिकायां तु 'नन्वनादिनित्यस्य जीवस्य उत्पत्तिः श्रुतावपि कथं युज्यते ? नित्यत्वमभ्युपेत्य उत्पत्तिवचनस्य, वन्ध्यात्वमभ्युपगम्य मातृत्ववचनेन साम्यात् इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे - युक्तेश्च।' इति स्पष्टमेव सूत्रत्वं तदभिमतं दृश्यते।

अयमत्र समाधानप्रकारः। सूत्रमेवेदं 'युक्तेश्च' इति। सूत्रत्वादेव आचार्यस्य 'नित्यस्यापि हि जीवस्योपाध्यपेक्षयोत्पत्तिर्युज्यते' इति तद्विवरणमुपपद्यते। अन्यथा तु 'युक्तेश्च' इति पदमत्र भाष्ये व्यर्थमापद्येत। 'नित्यस्यापि हि....युज्यते' इत्यनेनैव युक्तिप्रदर्शनसंभवेन 'युक्तेश्च' इत्यस्य वैयर्थ्यात्।

आचार्यस्यैवेयं शैली यत् सूत्रोक्तस्य भाष्येण विवरणम्। यथा 'युक्तेः शब्दान्तराच्च' (२-१-६-१९) इति सूत्रस्य 'साधनानां साधनत्वं यदात्माधीनमिष्यते। तदा साधनसंपत्तिरैश्वर्यद्योतिका भवेत्।। इत्यादेः साधनान्तरेणापि सृष्टिर्युक्ता। अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ इति शब्दान्तराच्च' इति व्याख्यानम्। न हि तत्रत्यभाष्यशैल्याः अत्रत्यभाष्यशैल्याश्च मात्रयापि विशेषोऽनुभूयते। उभयत्रापि युक्तेः इत्यस्य भाष्ये व्याख्यादर्शनात्।

कथं तर्हि तत्त्वप्रदीपिका। इत्थम्। 'अविनष्टा एवोत्पद्यन्ते विरुद्धमिति न मन्तव्यमित्याह - युक्तेश्च इति। तामेव युक्तिं प्रकटयत्युत्तरभाष्येण' इति खलु तदग्रन्थस्य वचनविन्यासः। न हि तत्त्वप्रदीपिका सूत्रव्याख्यानरूपा, किन्तु भाष्यव्याख्यानरूपा। तथा च 'न मन्तव्यमित्याह- युक्तेश्च' इत्येतेन वाक्येन 'युक्तेश्च' इत्येतद्वाक्यावतरणिकादानपरतया प्रतीयमानेन 'युक्तेश्च' इत्यस्य भाष्यत्वशङ्का भवेत्। अनन्तरं च 'तामेव युक्तिं प्रकटयत्युत्तरभाष्येण' इत्यनेन च सा शङ्का उपोद्वलिता भवति।

परन्तु तत्त्वप्रदीपिकायां बहुलमेतादृशं दृष्टं तस्याः सूत्रावतरणिकादानरूपत्वम्। यथा 'स्याच्चैकस्य ब्रह्मशब्दवत्' (२-३-१-५) इति सूत्रे 'अनित्यानीत्युक्तत्वात् प्राणश्रद्धयोः प्रलयेऽपि परावरप्रतिभानाद्भागश एवोद्भवाभिधानम्। आकाशे त्वव्याकृतस्य प्रदेशशब्दितस्यानादित्वात् उत्पत्तिमन्ति चानुत्पत्तिमन्ति च इति कथम् इत्यत आह -**स्याच्चैकस्य ब्रह्मशब्दवत्** इति' इति तत्त्वप्रदीपिकायाः 'स्याच्चैकस्य ब्रह्मशब्दवत्' इति सूत्रव्याख्यानपरता इव दृश्यते। परन्तु तद्वस्तुतः तत्सूत्रस्य अवतरणिकादानम्, सूत्रभाष्यस्य बहुत्र सूत्राक्षरसंबद्धतया सूत्रमपि स्वस्मिन्नन्तर्भावयतः भाष्यस्य अवतरणिकादानं च। न तु वस्तुतः सूत्रव्याख्यानपरता[33]। तस्मात् 'न मन्तव्यमित्याह - युक्तेश्च' इति पूर्ववाक्यस्य भाष्यावतरणिकापरत्वेन सूत्रव्याख्यानपरत्वप्रयुक्तसंशायकत्वे निरस्ते, तदुत्तरस्य 'तामेव युक्तिं प्रकटयत्युत्तरभाष्येण' इति

---

[32] पूर्वम् उडुपीनगरमुद्रिते तत्त्वप्रदीपपुस्तके तु बहुत्र बोल्ड् (लिपिपीनत्व)चिह्नम् उपयुक्तं, तत्तु तत्त्वप्रदीपिकायाः बहुत्र भाष्यगर्भत्वात् तत्सूचनार्थम्। के.टि.पाण्डुरङ्गीमुद्रिते तु पुस्तके तन्नास्ति।

[33] भाष्यस्य सूत्राक्षरसंबद्धतायाश्च बहुत्र उदाहरणानि भवन्ति। यथा 'शास्त्रयोनित्वात्' इति सूत्रे यद्यपि इदानीम् 'अनुमानतोऽन्ये न कल्पनीयाः। **शास्त्रयोनित्वात्।** नावेदविन्मनुते तं बृहन्तं सर्वानुभुमात्मानं सांपराये औपनिषदः पुरुषः इत्यादिश्रुतिभ्यः' इति पठ्यते। तथापि अत्र 'अनुमानतोऽन्ये न कल्पनीयाः। नावेदविन्मनुते तं बृहन्तं सर्वानुभुमात्मानं सांपराये औपनिषदः पुरुषः इत्यादिश्रुतिभ्यः **शास्त्रयोनित्वात्**' इत्यन्वयः। 'इत्यादिश्रुतिभ्यः शास्त्रयोनित्वात्' इति खलु भाष्यस्य सूत्राक्षरेण अन्वयः। एवं तत्त्वप्रदीपे प्रथमस्य द्वितीये 'विवक्षितगुणोपपत्तेश्च' इति सूत्रभाष्यव्याख्याने 'प्रसिद्धार्थत्वात्सूत्रभाष्ययोरेकीभावः' इत्युक्तम्। एवं सर्वत्र भाष्ये।

वाक्यस्यापि संशायकता स्वयमेव निरस्ता भवति। न हि 'उत्तरभाष्येण' इत्येतावन्मात्रेण पूर्वस्थस्य सर्वस्य वाक्यस्य सूत्रत्वं शङ्कार्हं भवेत्। एवमेव बहुत्र तत्त्वप्रदीपिकायाः सूत्रावतरणिकादानं दृश्यते। यथा 'प्रतिज्ञाहानि°....' (२-३-१-६), 'यावद्विकारं तु.... '(२-३-१-७) इत्यादौ।

किंच अत्र 'उत्तरभाष्येण' इत्यस्य सिद्धान्तभाष्येण इत्यर्थः। तथा च प्रयुक्तं तत्त्वप्रदीपिकायां 'चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः' इति सूत्रे (३-१-१०)

'**न यज्ञादिकृतो** यज्ञादिफलं **गमनागमनम्**। चरणशब्दस्य यज्ञाद्यतिरिक्तविषयत्वात्। तत्र प्रमाणमाह- **आचार** इति पूर्ववादी। उत्तरभाष्यस्यायमर्थः....' इत्यादि।

अनेकत्र चैतादृशं दृष्टं तत्त्वप्रदीपिकायां यथा 'तदापीतेः संसारव्यपदेशात्' (४-२-६-८) सूत्रे 'नैतावता साम्यमिति संबन्धभाष्येण' इति। तथा 'आकाशस्तल्लिङ्गात्' (१-१-८-२२) इति सूत्रे 'अनेन संगतिभाष्येण संशयबीजसूचनपरोऽपि...' इत्यादि।

अत्र च 'उत्तरभाष्येण' इत्यस्य संगतिरेवं — यद्यपि 'युक्तेश्च' इत्येतत् न पृथगधिकरणम् इति न तत्र पृथक्पूर्वपक्षप्रसङ्गः। तथापि प्रत्येकसूत्रीयपूर्वपक्षः सर्वत्राविशिष्टः। तं च सूचयति त्रिविक्रमाचार्यः 'अविनष्टा एवोत्पद्यन्ते इति विरुद्धमिति न मन्तव्यमित्याह- युक्तेश्च इति'। यद्यपि अस्मिन् सूत्रे न पृथक्पूर्वपक्षो दृश्यते। तथापि पूर्वसूत्रीयभाष्येन '**अविनष्टा एवोत्पद्यन्ते**' इत्यनेन तं सूचयति। अनन्तरं च तादृशपूर्वपक्षं निरसितुं सूत्रं 'युक्तेश्च' इति। तस्य च विवरणं सिद्धान्तभाष्येण इत्याह 'तामेव युक्तिं प्रकटयत्युत्तरभाष्येण' इति। तस्मादत्र 'उत्तरभाष्येण' इत्येतदन्यार्थे प्रयुक्तं पदं स्वीकृत्य अन्यार्थे उपयोगः न समीचीन इति विभावनीयम्।

तस्मात् नात्र तत्त्वप्रदीपिकासंवादः। ह.मातृकायाश्च अनेकत्र स्खलितत्वेन निश्चितत्वात् अत्रापि स्खलितत्वाङ्गीकारो युक्त एव।

किंच न्यायविवरणसूचितमिदं सूत्रम्। तथा हि 'न चानादित्वाज्जीवस्य पराधीनविशेषाप्राप्तिः। इदं सर्वमसृजत इति सर्वस्मिन् संगृहीतत्वात्। पराधीनविशेषवत्त्वेऽप्यनादित्वस्याविरोधात्' इति न्यायविवरणम्। अत्र चान्तिमेन वाक्येन युक्तिः 'युक्तेश्च' सूत्रोक्ता विव्रियते।

यद्यपि शांकर-रामानुजभाष्ययोः नेदं सूत्रमस्ति। तथापि बहुत्र तद्विसंवादस्योपलम्भात् नात्र तत्संवादाभावो दोषः। एवं सर्वत्रापि ऊह्यम्[३४]।

तत्र जयतीर्थैः स्थलद्वये मूलकोशोल्लेखः कृतो दृश्यते। तस्मात् तदीयसूत्रत्वनिश्चयस्य मूलकोशमूलकतया नाप्रामाण्यशङ्का। न हि आचार्यस्यानन्तरं चत्वारिंशत्संवत्सरेष्वेव[३५] सूत्रान्तरप्रक्षेपावकाशः।

'स्मरणाच्च'

'स्मरणाच्च' इति सूत्रं (३-१-१३-२३) ह.पाठे भाष्यत्वेन पठ्यते। जयतीर्थैस्तु सूत्रत्वेन पठ्यते। 'तृतीये शब्दावरोधः संशोकजस्य' इति पूर्वसूत्रस्य 'तृतीये तृतीयतमसः श्रवणादेव शब्दानुसारेण संशोकजमोहप्राप्तिस्मरणाच्च। महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाधरम्। श्रवणेनैव मूर्च्छादिरधरस्य यतो भवेत्। तस्मान्न विस्तरेणैतत्कथ्यते राजसत्तम। इति कौर्मे' इति भाष्यस्य ह.पाठः। अत्र अन्तिमवाक्ये 'संशोकजमोहप्राप्तिः' इति विच्छिद्य पठित्वा अनन्तरं च 'स्मरणाच्च' इति सूत्रं पठित्वा तद्व्याख्यानतया 'महातमः' इति स्मृतिः व्याख्यायते जयतीर्थैः।

---

[३४] शांकर-रामानुज-मध्वभाष्येषु सूत्रादिक्रमस्य विषये द्र० श्रीभाष्यश्रुतप्रकाशिकायाः वीरराघवाचार्याणां भूमिका पृ.३०-३२, १९६७।

[३५] बि.एन्.के.शर्मविरचिते द्वैतवेदान्तेतिहासे। पृ.२४५, १९८३। अत्र पुस्तके आचार्याणां कालः १२३८-१३१७। जयतीर्थपीठाधिपत्यकालः १३६५-८८ इति निर्दिष्टम्। तस्मात् १३१७ वर्षात् अनन्तरं जयतीर्थोत्पत्तिकालं (गरीयसा पक्षेण १३४५? वर्षम्) यावत् तयोर्व्यवधानम्। जयतीर्थपीठाधिपत्यकालपर्यन्तं व्यवधानस्वीकारेऽपि चत्वारिंशद्वर्षाण्येव व्यवधानं भवति।

अत्र गोविन्दाचार्यैः अन्यत् किमपि गमकं न प्रदर्शितम् अस्य वाक्यस्य असूत्रत्वे। तथापि अत्रैवं शङ्काबीजानि।

'स्मरणाच्च' इत्यस्य पृथक्सूत्रत्वे 'तृतीये शब्दावरोधः संशोकजस्य' इति सूत्रे श्रुतिवाक्यस्य वा स्मृतिवाक्यस्य वा युक्तेर्वा अनुदाहरणेन कथमिदं भाष्यं श्रुत्यादिविहीनमिति शङ्का भवेत्। तत्परिहाराय च 'स्मरणाच्च' इत्यत्र उदाहृता कौर्मस्मृतिः अस्मिन्नेव सूत्रे भवेत् इत्यपि शङ्का भवेत्। यत आचार्यस्येयं शैली या सूत्रस्य श्रुत्यादिमूलकत्वेन सूत्रितार्थे श्रुतिस्मृतियुक्तिसंवादिताप्रदर्शनमिति। यद्यत्र श्रुत्यादिकं नास्ति तत्र चान्यत् किमपि योजनीयमिति शङ्का भवति। तथा अत्रापि।

किंच तत्त्वप्रदीपिकायां सर्वेषामपि सूत्राणां कण्ठतो ग्रहणं कृतम्, नात्र 'स्मरणाच्च' सूत्रस्य कण्ठतो ग्रहणं तत्र दृश्यते, किन्तु मूर्च्छादिपदव्याख्यानमेव दृश्यते इति 'स्मरणाच्च' इत्यस्य सूत्रत्वे शङ्का भवति।

तथापि आचार्यैः अनेकत्र स्वोक्तार्थे श्रुत्याद्यनुदाहरणमपि दृष्टम्। यथा 'न वा विशेषात्' (३-३-१३-२२) इति सूत्रभाष्ये किमपि श्रुत्यादिकं नास्ति। किन्तु 'दर्शयति च' इत्युत्तरसूत्रेणैव तद्दर्शितम्। तथा 'असार्वत्रिकी' (३-४-२-१०) इत्यत्र किमपि नास्ति। तदुत्तरस्मिन् 'विभागश्शतवत्' इत्यत्रैव श्रुत्यादिकं दर्शितम्। तथा 'आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते' (३-४-७-४६) सूत्रे किमपि नास्ति। तथा बहुत्र[३६] श्रुत्याद्यनुदाहरणं दृश्यते। परन्तु तेषु स्थलेषु युक्तयः उक्ताः।

तदेवं 'तृतीये..' इति सूत्रे प्रथमतः स्वाभिमतमर्थमुक्त्वा अनन्तरसूत्रेण स्मृतिप्रदर्शनमिति नास्ति श्रुत्याद्यनुदाहरणदोषः।

किंच तत्त्वप्रदीपिकायां 'तृतीये तमसि श्रुतमात्र एव तच्छब्दानुसारेण संशोकजस्य अत्यन्तदुःखोद्भूतस्य मोहस्य अवरोधः प्राप्तिः' इति व्याख्यानात् '॰प्राप्तिः' इत्येव भाष्यं निश्चीयते, न तु '॰प्राप्तिस्मरणाच्च' इति।

तत्त्वप्रदीपिकायामपि केषांचित् सूत्राणां तद्भाष्याणां च विवरणमेव नास्ति। यथा 'अग्न्यादिगतिश्रुतेः....' (३-१-४), 'स्मर्यतेऽपि च लोके' (३-१-१५-२०)। तथा अन्यत्र बहुषु स्थलेषु। क्वचिच्च सूत्रव्याख्याने कृतेऽपि तत्र सूत्रं कण्ठरवेणागृहीत्वा तत्रत्यानां केषांचित्पदानां व्याख्यानं दृश्यते। यथा 'दर्शनात्' (३-२-१६-३३) इत्यत्र। तत्र च सूत्रं न कण्ठतः उपात्तम्, परन्तु 'अदृष्टत्वम्' इत्यादीनां भाष्यस्थपदानां व्याख्यानं दृश्यते।

तस्मात् तत्त्वप्रदीपिकायां सूत्रस्य कण्ठतोऽनुपादानं न अस्य सूत्रत्वप्रतिक्षेपे कारणं भवति। किन्तु मूलकोशानुसारेण जयतीर्थैः अस्य सूत्रत्वेन परिगणनात् ह.पाठेऽपि 'संशोकजमोहप्राप्तिः' इति विच्छिद्य पठित्वा अनन्तरं च 'स्मरणाच्च' इति सूत्रतया पठनीयम्।

अन्यमतीयभाष्यकारैः अस्यानुपादनमपि न दोष इत्युक्तमेव पुरस्तात्।

'दर्शनात्'

'दर्शनात्' इति प्र.पाठः (३-२-१७-३३), 'दर्शनात्तु' इति ह.पाठः। परन्तु 'दर्शनात्तु' इत्येव सूत्रम्। वाक्यार्थमुक्तावल्यां 'तुरवधारणे' इति व्याख्यानात्।

'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्'

'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (३-३-२-७) इति यद्यपि सूत्रस्य मुद्रितः प्र.पाठः। चशब्दो नास्ति ह.पाठे। तथापि कुत्रापि तस्य व्याख्यानाभावात् नात्र गोविन्दाचार्यदर्शितदिशा पाठभेदावसरः।

'प्रदानवदेव हि तदुक्तम्'

[३६] यथा गच्छमुखिपुस्तके तृतीयाध्याये पृ.१३५.१४९,१६८,१७७,१९१,१९४,२०७,२०९,२१८,२१९,२५८,२८०,२८,३२२ इत्यादिषु।

'प्रदानवदेव हि तदुक्तम्' (३-३-२६-४४) इति प्र.पाठः। हिशब्दो नास्ति ह.पाठे। 'प्रदानवदेव तदुक्तम्' इत्येव सूत्रपाठः, सुधायां तत्त्वप्रकाशिकायां च हिशब्दस्य व्याख्यानाभावात्। प्रत्युत कुम्भकोणमुद्रितानुव्याख्याने मुद्रितसुधायां शे.वा. चन्द्रिकायां च हिशब्दादर्शनाच्च। वाक्यार्थमुक्तावल्यां हिशब्दाव्याख्यानाच्च। तस्मात् ह.पाठः जयतीर्थसंमतः।

'शब्दश्चातोऽकामचारे'

'शब्दश्चातोऽकामचारे' (३-४-४-३१) इति मुद्रितः प्र.पाठः। 'शब्दश्चातोऽकामकारे' इति ह.पाठः। परन्तु सर्वत्र व्याख्यासु चकारघटित एव पाठो व्याख्यातः, नात्र किमपि विरुद्धं गमकं पश्यामः। यद्यपि 'कामकारेण चैके' (३-४-४-१५) इति सूत्रे ककारघटितः पाठः। तथापि तत्र स्पष्टं 'कामकारः कामितकरणम्' इति तत्त्वप्रदीपिकायां व्याख्यानात् तथात्वाङ्गीकारेऽपि नात्र स्पष्टं तथावगम्यते। 'न कामचरितं चरेत्' इति श्रुत्यनुसाराच्च।

'आ प्रायणात्तत्रापि हि दृष्टम्'

'आ प्रायणात्तत्रापि हि दृष्टम्' इति ज.पाठः (४-१-७-१२), 'आ प्रयाणात्' इति ह.पाठः। 'प्रायणान्तमोंकारमभिध्यायीत' इति श्रुत्यनुसारेण 'प्रायणात्' इति भाव्यमिति भाव्यते। तत्त्वप्रदीपे 'यावन्नारायणं प्रति प्रयाणात्मको मोक्षः' इति दर्शनेऽपि तस्यार्थप्रदर्शनपरत्वोपपत्तेः न विरोधः।

अथ वा तत्त्वप्रदीपिकानुसारेण 'प्रयाणात्' इति सूत्रपाठेऽपि न विरोधः। जयतीर्थैः 'प्रायणात्' इत्यनुदाहरणात्। शांकररामानुजभाष्ययोः 'प्रायणात्' इति दर्शनस्य विनिगमकत्वं तु नास्ति।

'तदपीतेः संसारव्यपदेशात्'

'तदपीतेः संसारव्यपदेशात्' (४-२-६-८) इति प्र.पाठः। 'तदापीतेः संसारव्यपदेशात्' इति ह.पाठः। अत्र तत्त्वप्रदीपे 'आ समन्ताद् अपीतिः आपीतिः' इति आपीतिशब्दो व्याख्यातः। तत्त्वप्रकाशिकायां न स्पष्टम्। परन्तु न तेन 'तदापीतेः' इति पाठः तत्त्वप्रकाशिकाविरुद्ध इति वक्तुं शक्यते। 'तदिति' इति प्रतीकग्रहणेऽपि 'तदापीतेः' इत्यनेन विरोधाभावात्। अत एव वाक्यार्थविवरणनाम्नि व्याख्याने 'सूत्रे तदापीतेः इति आ अपीतेः इति पदच्छेदः। तस्यां सम्यगपीतिमत इत्यर्थः' इति तदर्थवर्णनं दृश्यते। परन्तु अन्यव्याख्यानेषु भावदीपादिषु 'तदपीतेः' इति पाठो दृश्यते। वाक्यार्थमुक्तावल्यां तु प्राचीनभाष्यव्याख्यातृमते 'तदापीते' इति सप्तमी इति अन्यत्र निरूपितम् इत्युक्तम्। तत्कथम् इति न ज्ञायते।

'अतश्चायनेऽपि हि दक्षिणे'

'अतश्चायनेऽपि हि दक्षिणे' (४-२-९-२१) इति प्र.पाठः। हिशब्दो नास्ति ह.पाठे। परन्तु तत्त्वप्रदीपिकायां हिशब्दो दृश्यते। अन्यत्र विसंवादविषयेषु स्थलेषु तत्त्वप्रदीपिकायां प्र.पाठापेक्षया विलक्षणपाठदर्शनेऽपि अत्र प्र.पाठसंमतपाठदर्शनेन प्र.पाठ एव तत्त्वप्रदीपाभिमत इति चिन्त्यते। नापि तत्त्वप्रकाशिकायां हिशब्दव्याख्या दृश्यते। तस्मात् ह.पाठे हिशब्दः प्रमादेन त्यक्त इति संभाव्यते।

ब्रह्मसूत्रभाष्ये प्रथमाध्याये प्रथमपादे पाठभेदविचारः

अत्र **प्र.पाठः** प्रचलितपाठः। **ह.पाठः** हृषीकेशतीर्थीयः। **रा.पाठः** रामचन्द्रतीर्थीयः (पूर्वमयमेव अक्षोभ्यतीर्थीयपाठत्वेन निर्दिष्ट आसीत्।)। **वे.पाठः** वेदगर्भनारायणाचार्यधृतः। अत्र प्रभञ्जनाचार्यप्रकाशितं सर्वमूलान्तर्गतं सूत्रभाष्यपुस्तकं गृहीत्वा एव भाष्यपृष्ठाङ्काः निरूपिताः सन्ति। भावदीपस्य पृष्ठाङ्काः

अन.एम्.पञ्चमुखिप्रकाशितपुस्तकस्य। अन्यटिप्पणीकृतां पृष्ठाङ्काः के.टि.पाण्डुरङ्गीप्रकाशितपुस्तकस्य। बृहदारण्यकादिग्रन्थपृष्ठाङ्काः गोविन्दाचार्यप्रकाशितपुस्तकस्य।

अत्र तु अस्मत्सुहृद्भिः रुचिराचार्यैः पुनः काश्चन सूचनाः दत्ताः एतद्विषये। तदनुसारेण क्वचित्पारिवर्तनं कृतम्। क्वचिच्च विप्रतिपत्तिरपि प्रदर्शिताधस्ताट्टिप्पण्याम्। तेषां कार्तज्ञ्यमावेदयामि।

१. पृ.४ 'ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः' इति प्र.रा.वे.पाठाः। परन्तु ह.पाठः 'क्रीडते परमेश्वरः' इति। अत्र कैरपि व्याख्यातृभिः किमपि नोक्तमिति 'परमेश्वरः' इति पाठस्साधुरिति चिन्त्यते। अथ वा उभयमपि समीचीनम्।

२. पृ.५ 'कश्चार्थश्च तयोर्विद्वन्कथमुत्तमता तयोः' इति प्र.रा.वे.पाठाः। ह.पाठस्तु 'कश्चार्थस्तु' इति। प्र.पाठे चकारवैयर्थ्यात् ह.पाठः समीचीन इति चिन्त्यते। सर्वदर्शनसंग्रहेऽपि 'कश्चार्थस्तु' इत्येव दृश्यते। भाष्यदीपिकायामपि तुशब्दघटितः क्वाचित्कः पाठः उद्धृतः।

३. पृ.६ 'अधमश्शमादिसंयुक्तो मध्यमस्समुदाहृतः' इति प्र.रा.वे.पाठाः। 'मध्यमस्स उदाहृतः' ह.पाठः। उत्तरत्र उत्तमाधिकारिलक्षणेऽपि तच्छब्दश्रवणात् अयमेव समीचीनो भाति। टीकायां न स्पष्टम्।

४. पृ.६ 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्। नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति प्र.रा.वे.पाठः। ह.पाठे तु 'नास्त्यकृतः' 'ब्रह्मनिष्ठम्' इत्यन्तं नास्ति। अत्र टीकाकृद्भिः सर्वस्यापि वाक्यस्य व्याख्यानकरणात् प्र.पाठस्स्वीकार्य एव। 'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति भागस्तु जयतीर्थैरव्याख्यातत्वात् नास्ति।

५. पृ.६ 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' इति प्र.रा.वे पाठाः। ह.पाठे तु 'तस्यैष' इत्युत्तरार्धं न पठ्यते। टीकायाम् उत्तरार्धमपि व्याख्यातमिव दृश्यते। तस्मात्तदेव ग्राह्यम्। तत्त्वप्रदीपेऽपि उत्तरभागो व्याख्यातः।

६. पृ.६ 'इत्यादिश्रुतिभ्यश्च' इति प्र.रा.वे.पाठाः। ह.पाठे 'इत्यादिश्रुतिश्च' इति। भावदीपे तु 'एतेन भाष्ये इत्यादिश्रुतिभिश्च इत्यस्य अधिकारश्चोक्त इति पूर्वेणान्वयः सूचितः' इति व्याख्यातम्।

७. पृ.६ 'स्त्रीशूद्रब्रह्मबन्धूनां तन्त्रज्ञानेऽधिकारिता' इति प्र.अ.वे.पाठाः। 'तन्त्र०' इति स्थाने 'तत्र' इति पठ्यते ह.पाठे। परन्तु टीकायां 'तन्त्रं पञ्चरात्रादि' इति तन्त्रशब्द एवादृतः। ह.पाठे प्रमादेन नकारो गलितः स्यात्। प्रथमतः अन्त्यजानां नामज्ञानाधिकारकथनम्, अनन्तरं सच्छूद्रादीनां पञ्चरात्राद्यधिकारकथनम्, अनन्तरं त्रैवर्णिकानां वेदाधिकारकथनम् इति हि क्रमः। न तु स्त्रीशूद्रादीनामपि वेदाधिकारपरं तत्, सन्दर्भानानुगुण्यात्। वेदाधिकारस्याप्रसक्तेश्च, उत्तरत्र त्रैवर्णिकानां वेदोक्तं इत्यनेन हि वेदाधिकारः प्रस्तुतः, न तु ततः पूर्वतनवाक्ये। तस्मात् तत्र इति पाठमवलम्ब्य तस्यार्थकथनं न समीचीनतां भजते। 'अधिकारता' इति वे.पाठः अर्शआद्यजन्तत्वस्वीकारात्।

८. पृ.७ 'न तु ग्रन्थपुरःसरं' इति प्र.रा.पाठौ। ह.पाठे 'न च ग्रन्थ०' इति। वे.पाठे 'न हि ग्रन्थ०' इति। प्र.रा.पाठौ प्रामादिकौ इति संभाव्यते। तुशब्दद्वयस्यास्वारस्यात्। ह.वे.पाठयोरन्यतरो ग्राह्यः।

९. पृ.७ 'बृहत्संहितायाम्' इति प्र.पाठः। रा.ह.पाठयोस्तु 'ब्रह्मसंहितायाम्' इति पठ्यते। तत्र किमपि निश्चेतुं न शक्यते। तादृशसंहिताया इदानीमनुपलभ्यमानत्वात्। परन्तु 'बृहद्ब्रह्मसंहिता' इति इत्येका संहिता संहितानामसु डेनियल् स्मिथ् महाशयेन स्वीयग्रन्थे निर्दिष्टा वर्तते। तदनुसारेण उभयमपि समीचीनं भवेत्। यथा तथा वास्तु, ग्रन्थोऽयं पञ्चरात्रान्तर्गतः।

१०. पृ.८ 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति समग्रं पठ्यते प्र.रा.पाठयोः। ह.पाठे तु 'द्रष्टव्यः' इतिपर्यन्तम्। टीकायां तु समग्रं वाक्यं व्याख्यातमिव दृश्यते। तस्मात्तत् ग्राह्यमेव। तत्त्वप्रदीपेऽपि श्रोतव्य इत्यंशः उदाहृतः।

११. पृ.८ 'यमन्तः समुद्रे कवयोऽवयन्ति यदक्षरे परमे प्रजाः। यतः प्रसूता जगतः प्रसूती तोयेन जीवान्

व्यससर्ज भूम्याम्' इति समग्रं पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे तु 'अवयन्ति' पर्यन्तमेव। तथैव वाक्यार्थमञ्जर्यां टीकाव्याख्यायाम् 'अवयन्ति इति पर्यन्तमेव भाष्यपाठः' इत्युक्तम्। तथा टीकायां उत्तरभागः न व्याख्यातः। तस्मात् प्र.रा.वे पाठाः न ग्राह्याः।

१२. पृ. 'तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्' इति समग्रं पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे 'तदेवर्तं तदु सत्यमाहुः' इति न पठ्यते। टीकायामपि न व्याख्यातः पूर्वभागः। तस्मात् प्र.रा.वे.पाठाः न ग्राह्याः।

१३. पृ.९ 'भाल्लवेयश्रुतिः' इति प्र.रा.वे.पाठाः। 'भाल्लवेयश्रुतेः' इति ह.पाठः। ह.पाठ एव ग्राह्यः, पूर्वं हेत्वाकाङ्क्षासत्वात्।

१४. पृ.९ 'यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या' इति प्र.रा.वे.पाठाः। 'तं संप्रश्नम्' इत्याद्युत्तरभागः ह.पाठे नास्ति। वाक्यार्थमञ्जर्यामपि 'तं संप्रश्नम्' इत्यादि भाष्ये नास्तीत्युक्तम्। नापि टीकायां व्याख्यातम्। ह.पाठ एव ग्राह्यः।

१५. पृ. ९ 'इत्येवशब्दान्नान्येषां सर्वनामता' इति प्र.रा.पाठौ। 'इति चैवशब्दात् न चान्येषां सर्वनामता' इति ह.पाठः। अत्र 'इति चैवशब्दात्' इति युक्तमेव[३७]। पूर्वमेव अन्यत्र नामानि न सन्ति, जगतः उत्पत्तिमत्त्वात् इत्युक्तत्वेन, तत्समुच्चायकत्वात्[३८]। परन्तु 'न चान्येषाम्' इत्यत्र चशब्दकृत्यं न भासते।

१६. पृ.९ 'अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः। इति विष्णोर्हि लिङ्गम्' इति प्र.रा.वे.पाठाः। ह.पाठे तु 'अजस्य नाभौ इति तस्य हि लिङ्गम्' इति। अत्र श्रुतिः समग्रतया टीकायां न व्याख्याता[३९]। अजस्येति प्रतीकधारणस्यैव कृतत्वात्। विष्णोः इति पदस्य स्थाने 'तस्य' इति पाठस्तु प्राचीनपाठत्वात् ग्राह्यः। नात्र किमपि विनिगमकम्।

१७. पृ.९ 'न च प्रसिद्धार्थं विनान्योऽर्थो युज्यते' इति प्र.रा.वे.पाठाः। 'न च प्रसिद्धार्थं विना अन्यो युज्यते' इति ह.पाठः। टीकायां तत्त्वप्रदीपे च तथैव पाठः।

१८. पृ. ९ 'परो दिवा पर एना पृथिव्या इति समाख्या०' इत्येतावन्मात्रमेव प्र.रा.वे.पाठेषु पठ्यते। ह.पाठे 'इति च समाख्या०' चशब्दमात्रमधिकम्। परन्तु टीकायां तत्त्वप्रदीपे च 'एतावती महिना संबभूव' इत्यंशोऽपि व्याख्यातः। नात्र विनिगमकम्।

१९. पृ. ९ 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्' इति प्र.रा.वे.पाठाः। ह.पाठे 'तं ब्रह्माणम्' इत्याद्यंशः नास्ति। परन्तु टीकायां व्याख्यातः। उपात्तश्च तत्त्वप्रदीपे।

२०. पृ.९ 'प्रसिद्धत्वात्सूचितत्वाच्चास्यार्थस्य' इति प्र.रा.पाठौ। ह.पाठे 'अस्य' इत्यंशो नास्ति। वेदगर्भीये न स्पष्टम्। ह.पाठस्साधुस्संभाव्यते। टीकायामपि 'अर्थस्य' इत्येव पाठः।

२१. पृ.९ 'न चेतरग्रन्थविरोधः' इति प्र.रा.वे.पाठाः। 'न चेतरग्रन्थैर्विरोधः' इति ह.पाठः। तत्त्वप्रदीपे तथा।

२२. पृ.११ 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति' इति समग्रं पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे 'भूतानि जायन्ते' इति पर्यन्तमेव पाठः। परन्तु सर्वोऽप्यंशः टीकायां व्याख्यातः। उपात्तश्च तत्त्वप्रदीपे। तथा तत्त्वप्रदीपे 'यो नः पिता' इति ऋच इव अपरस्यापि ऋग्द्वयस्य व्याख्यानं दृश्यते। तदपि भाष्यान्तर्गतं वा संदिह्यते।

---

[३७] नानेन इत्येवशब्दात् इति प्र.पाठस्यायुक्तता प्रतिपाद्यते, किन्तु अयोगव्यवच्छेद एव।

[३८] अत्र रुचिराचार्याक्षेप एवम् --- 'इति चैवशब्दात्' इति पाठे भवदुक्तार्थविवक्षायाम् 'इत्येवशब्दाच्च' इति भाव्यम्। 'नान्येषां सर्वनामता' इत्यस्य समुच्चायकत्वापपत्तेः। प्रकृते तु 'इति चैवशब्दात्' इत्युक्तौ एवशब्दापरस्थापकान्तररूपार्थः लभ्यते, स चायुक्त इति पाठोऽयमयुक्त एव। वस्तुतस्तु 'नान्येषां सर्वनामता' इत्यत्र समुच्चायकमानप्रसक्तिरेव नास्ति। --- इति। अत्रेदं विचारणीयम्। 'इति चैवशब्दात्' इत्यस्य 'इति एवशब्दाच्च' इति पाठयोः एकार्थकत्वेन आद्यदोषो नास्ति। 'इति एवशब्दाच्च' इत्यर्थकेन 'इति चैवशब्दात्' इति वाक्येन एवशब्दापरस्थापकान्तररूपार्थः नैव लभ्यते इत्यपि विभावनीयम्। किंच मया इत्येवशब्दात् इति पाठस्यायुक्तता नैवोक्ता इति पूर्वमेवावदितम्।

[३९] समग्रतया टीकायां श्रुतिव्याख्यानाभावात् 'पद्मनाभत्वांलिङ्गादयं विष्णुरेव' इति टीकावाक्यपर्यालोचनयापि नैतच्छ्रुतिग्रहणं पूर्णतया भाष्ये सिध्यति।

अथ वा भाष्यार्थोपपादनाय व्याख्यातं भवेत्। नैतावता तत्त्वप्रदीपतत्त्वप्रकाशिकयोर्विरोधः।

२३. पृ.११ 'नावेदविन्मनुते तं बृहन्तं सर्वानुभूमात्मानं सांपराये' इति प्र.रा.वे.पाठाः। 'बृहन्तम्' इत्यन्तमेव पठ्यते ह.पाठे। परन्तु टीकायां तत्त्वप्रदीपिकायां च व्याख्यातः स भागः।

२४. पृ.११ 'इत्यादिश्रुतिभ्यः' इति प्र.रा.पाठौ। 'इत्यादिश्रुतिः' इति ह.पाठे। तत्त्वप्रदीपानुगुणः ह.पाठः। 'शास्त्रयोनित्वे प्रमाणमाह-नेत्यादि' इत्यवतारितत्वात्। नात्र विनिगमकम्।

२५. पृ.१२ 'महाकौर्मे' इति प्र.पाठः। 'कौर्मे' इति ह.पाठे समीचीनम्। रा.पाठः कीदृशः इति न ज्ञायते। पञ्चमुखिपुस्तकमुद्रणरूपत्वात्तस्य पुस्तकस्य। पञ्चमुखिपुस्तकं ह.पाठ-प्र.पाठाभ्यां संकीर्णम्।

२६. पृ.१२ 'शक्यत्वाच्चानुमानानाम्' इति रा.पाठः न साधुरिव भाति। 'अनुमानाम्' इति प्र.ह.पाठौ[४०]।

२७. पृ.१३ 'विकल्प्योऽपोह्य इत्यहम्' इति प्र.रा.वे.पाठाः। 'विकल्प्यापोह्य इत्यहम्' इति ह.पाठः। सः तत्त्वप्रदीपादृतः। टीकायां तु किमिति स्पष्टतया न ज्ञायते। 'विकल्प्यापोह्यः' इति पाठस्तु टीकाया अविरुद्ध एव। तत्त्वप्रदीपानुसारित्वात् टीकायाः। नात्र किमपि विनिगमकम्।

२८. पृ.१४ 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' इति पूर्णं पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे 'निवर्तन्ते' इतिपर्यन्तमेव। तथैव तत्त्वप्रदीपे। टीकायामपि न व्याख्यातः उत्तरभागः।

२९. पृ.१४ 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' इति समग्रं पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे तु 'अस्पर्शम्' इति पर्यन्तमेव। तत्त्वप्रदीपे तु नोपात्ता, न व्याख्याता च इयं श्रुतिः। टीकायां तु 'अशब्दमित्यादेः' इति प्रतीकं गृह्यते। आदिपदेन कियत्पर्यन्तं ग्राह्यमिति न निश्चीयते।

३०. पृ.१४ 'येन वागभ्युद्यते' इति प्र.रा.वे.पाठेषु वर्तते। ह.पाठे नास्ति। एतत्पूर्वतनभागोऽपि टीकायां न व्याख्यातः, नापि तत्त्वप्रदीपे।

३१. पृ.१४ 'येन श्रोत्रमिदं श्रुतम्' इति प्र.रा.वे.पाठेषु दृश्यते। ह.पाठे नास्ति। टीकायामेतत्पूर्वतनभागस्तु उपात्तः। नायमुपात्तः। तत्त्वप्रदीपे सर्वोऽपि भागः नोपात्तः।

३२. पृ.१४ 'इत्यादेर्न' इति प्र.पाठः। 'इत्यादिभिर्न' इति ह.रा.पाठौ। परन्तु भावदीपे 'इत्यादिभिर्न तच्छब्दगोचरमिति भाष्यं व्यनक्ति- यत इति।' इति व्याख्यानात् तथा 'भाष्ये बहुवचनोक्तावपि प्रत्येकं साधकत्वद्योतनाय श्रुतेरित्येकवचनोक्तिः' इति वचनाच्च इत्यादिभिर्न इति पाठः सर्वसंमत इति भाति।

३३. पृ.१४ 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति' इति पूर्णं पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे 'तपांसि सर्वाणि' इत्यादि उत्तरार्धं नास्ति। परन्तु टीकायां तत्त्वप्रदीपे च व्याख्यातस्स भागः।

३४. पृ.१५ 'वेदान्तकृद्वेदविदेव चाहम्' इति पठ्यते प्र.रा.वे.पाठेषु। न तु ह.पाठे। टीकायां तु एतत्पूर्वभागस्य सूचनया उपात्तत्वेऽपि अयं भागः नोपात्तः। प्रकृतानुपयुक्तश्च। वाच्यत्वस्यैव प्रसक्तेः[४१]।

३५. पृ.१५ 'इत्यादिश्रुतिस्मृतिभिश्च' इति प्र.रा.पाठयोः। ह.पाठे 'इत्यादिभ्यश्च' इत्येव पठ्यते। नात्र विनिगमकम्।

३६. पृ.१५ 'पश्यन्तोऽपि न पश्यन्ति' इति प्र.रा.वे.पाठाः। ह.पाठे 'पश्यन्ति' स्थाने 'जानन्ति' इति। ह.पाठः ग्राह्यः। अर्थस्वारस्यं विना न विनिगमकम्। पश्यन्तोऽपि न जानन्ति इत्यस्य चक्षुः व्यापारयन्तोऽपि न ज्ञानाश्रया भवन्ति इत्यर्थः।

३७. पृ.१५ 'सोऽनात्मेति सतां मतम्' इति प्र.रा.वे.पाठाः। 'मतम्' इति स्थाने 'मतः' इति पठ्यते ह.पाठे। नात्र विनिगमकम्।

३८. पृ.१६ 'सन्दोहे गहने प्रविष्टः' इति प्र.रा.वे.पाठाः। 'सन्दोघे' इति ह.पाठे। तत्त्वप्रदीपादृतपाठभिन्नः सः,

---

[४०] अनुमानानाम् इति पाठोऽपि कोषे दृश्यते इति रुचिराचार्योक्तिः। परन्तु कियत्सु कोशेषु लभ्यते इति विचारणीयम्। टीकायां यत्र कुत्रापि अनुमाशब्दो नोपात्तः। किन्तु प्रायः सर्वत्र अनुमानशब्द एवेति नात्र 'श्रुत्यादिसाहित्यहीनानुमानस्य' इति टीका विनिगमिका।

[४१] अत्र रुचिराचार्योक्तिः 'शब्दादिगुणशून्यं तदविषयश्चेति टीकापर्यालोचनया वेदान्तकृद्वेदविदेव चाहम् इत्यस्योपयोगः भासते' इति। कथम्।

सन्दोहपदस्य तत्र व्याख्यानात्[४२]। परन्तु 'संदोघः कार्यकारणसंघातः' इत्यपि तत्त्वप्रदीपिकायां दृश्यते। गुर्वर्थदीपिकायां 'सन्दोघे' इति वर्तते। परन्तु गोविन्दाचार्यप्रकाशिते बृहदारण्यकपुस्तके 'सन्देहे' इति वर्तते। विचार्यमेतत्। अत्र भाष्यस्य मूलपाठः कः इति न ज्ञातुं शक्यते। यद्यपि आचार्यैः शाख्यान्तरीयवचनसंग्रहाय बहुत्र शाखान्तरवचनमिश्रितानि प्रसिद्धशाखीयवचनानि उदाहृतानि। तथापि प्रबलेऽत्र आचार्यसाक्षाच्छिष्यव्याख्याने जाग्रति कथं 'संदोघे' इति पाठानुसरणम्?। न हि पण्डिताचार्यैरत्र तादृशं लिङ्गं दर्शितम्, येन शाखान्तरस्थमिदं वचनमिति चिन्तयामः। अनेकत्र च पण्डिताचार्यैः तादृशं लिङ्गं दर्शितम्। नात्र तथा। तत्कथम्?।

३९. पृ.१६ 'सोपचारोऽभिधीयते' इति प्र.रा.पाठौ। 'सोपचारः प्रयुज्यते' ह.पाठः समीचीनो भाति। वेदगर्भीये न स्पष्टम्। 'सोपचारः प्रयुज्यते' इति प्रचलितकोशेष्वपि दृश्यते इति रुचिराचार्योक्तिः।

४०. पृ.१६ 'वाचो विमुञ्चथ' इति प्र.रा.वे.पाठाः। 'वाचो मुञ्चथ' इति ह.पाठः। टीकायां तत्त्वप्रदीपे च न स्पष्टम्। प्राचीनः पाठः क इत्यन्वेषणीयम्। सन्यायरत्नावल्यां सुधायां च 'विमुञ्चथ' इत्येव। शांकरभाष्ये भामत्यां च 'विमुञ्चथ' इत्येव पठ्यते। यथा शां.भाष्ये द्युभ्वादिसूत्रे 'यच्चैतत् अन्या वाचो मुञ्चथेति वाग्विमोचनम्' इति, भामती च 'यश्च वाचो विमुञ्चथ इति वाग्विमोकः' इति च[४३]। तथैव रङ्गरामानुजीये उपनिषद्भाष्ये तत्कृतविषयवाक्यदीपिकायां च पाठो लभ्यते। श्रीकण्ठादिभाष्येषु कथमिति द्रष्टव्यम्।

४१. पृ.१७ 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते' इति प्र.रा.वे.पाठेषु। ह.पाठे तु नास्ति। तत्त्वप्रदीपादृतपाठापेक्षया टीकादृतपाठापेक्षया च भिन्नः सः। तत्रैतस्य व्याख्यातत्वात्[४४]।

४२. पृ.१७ 'विलापयति' इति प्र.रा.वे.पाठाः। 'विलाययति' इति ह.पाठः। टीकायां तत्त्वप्रदीपे च न स्पष्टम्। 'इदं शरीरं भूतेषु विलापयति केशवः' इति बृ.उ.भाष्ये (पृ.३४०)। तथैव 'तदभिध्यानादेव तु तल्लिङ्गात्सः' इति सूत्रे (२-३-७-१३) 'स ब्रह्मणा विसृजति स रुद्रेण विलापयति' इति प्र.पाठः। ह.पाठे तु तत्रापि 'विलाययति' इति पाठः। परन्तु 'नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः' (२-३-९-१७) इति सूत्रे 'स इदं सर्वं विलाप्यान्तस्तमसि निलीनस्तद्विलाप्य व्युत्तिष्ठते स इदं सर्वं विसृजति विलापयति प्रस्थापयति..' इत्यादिः प्र.पाठः। तत्र 'विलाप्य' इति ह.पाठेऽपि पठ्यते। परन्तु 'विलापयति' इति तु न पठ्यते, तत्पदमेव नास्ति। तस्मात् विलापयति इति पाठः अनुगतो दृश्यते।

४३. पृ.१७ 'इति स्वस्यैव' इति प्र.रा.वे.पाठाः। 'इत्यादि स्वस्यैव' हपाठः स्वीकार्यः। अर्थभेदस्तु नास्त्येव।

४४. पृ.१७ 'न हि गौणात्मनि निर्दोषस्य लयः' इति प्र.रा. पाठौ। 'न हि निर्दोषस्य गौणात्मनि लयः' इति ह.पाठः तत्त्वप्रदीपसम्मतः। टीकायां न स्पष्टम्।

४५. पृ.१८ 'प्रायेणान्यत्र प्रसिद्धानाम्' इति प्र.रा.पाठयोः। 'प्रायेण' इति नास्ति ह.पाठे। तत्त्वप्रदीपेऽपि नास्ति। टीकायाः तत्त्वप्रदीपानुसारित्वात् ज.पाठेऽपि नास्तीत्यूह्यते। टीकायां पूर्वमेव एकवारं 'प्रायेण' इत्यस्य कृत्यं दर्शयित्वा 'पुनः एतत्पादप्रतिपाद्यं दर्शयति- प्रायेण इति' इति अवतरणिकादानेनापि नात्र प्रायेण इत्यस्य द्विवारं प्रयोगः टीकासंमतो भासते। एकस्यैव आवृत्त्या व्याख्यानसंभवात्।

४६. पृ.१८ 'तच्च ब्रह्म' इति प्र.रा.पाठयोः। 'तच्च' इति ह.पाठे। तथैव वेदगर्भीयेऽपि।

४७. पृ.१८ 'अवयवमात्रस्य ज्ञेयता' इति प्र.रा.वे.पाठाः। 'ज्ञेयता' स्थाने 'जिज्ञास्यता' इति वाक्यार्थमुक्तावल्यां पठ्यते। टीकायां किमिति न स्पष्टम्। तत्त्वप्रदीपे 'ज्ञेयता' इत्येवादृतमिव प्रतीयते।

४८. पृ.१८ 'इत्यत आह- आनन्दमयोऽभ्यासात्' इति प्र.रा.वे.पाठेषु। परन्तु गुर्वर्थदीपिकायां

---

[४२] तथा 'प्रविष्टो गहने देहमध्ये संदोहनामनि' इति बृहद्भाष्यानुसारेण 'संदोहे' इत्येव समीचीनमिति रुचिराचार्योक्तिः। परन्तु गो.मुद्रिते बृ.उ.भा.पुस्तके 'संदेहनामनि' इति पठ्यते (बृ.उ.भा.६-४-१३, पृ.३४५)। तत्र प्र.पाठः 'संदोह(घ)नामनि' इति। कंसे घवर्णो निवेशितः।

[४३] 'द्युभ्वाद्यायतनं स्वशब्दात्' (१-३-१) इति सूत्रे पृ. २७३ निर्णयसागरपुस्तके।

[४४] द्र० पूर्वमेवास्य विषये लिखितम्।

'स्वमूलभाष्यसंपुटिकायां पृथक्सूत्रपाठाभावात् संगत्यर्थमुदाहृतेत्युक्तम्'[6] । यत्र तु पृथक्सूत्रपाठोऽप्यस्ति तत्र तूदाहृतप्रतिज्ञाभागमित्येव वाक्यं द्रष्टव्यम्' लिखितम्। परन्तु तत्त्वप्रदीपे पृथक्सूत्रपाठोऽपि वर्तते। तदनुसारेण टीकायामपि स्यादेव। तथा ह.पाठेऽपि।

४९.पृ.१८ 'एवमन्येषामपि' इति प्र.रा.पाठौ। ह.पाठे 'एवमन्येषाम्' इत्येव पठ्यते। तथैव वे.पाठः। तत्त्वप्रदीपे तु 'अतः एव अन्यदेवतानां च' इत्युक्तम्। 'एवमिन्द्रबृहबृहस्पत्यादीनामपि' इति टीकायाम्।

५०.पृ.१८ 'बृह जातिजीवकमलासनशब्दराशिषु' इति प्र.रा.वे.पाठाः। ह.पाठे 'बृह' इति नास्ति। तत्त्वप्रदीपादृतपाठापेक्षया टीकादृतपाठापेक्षया च भिन्नः सः। तत्र तस्योपादानात्।

५१.पृ.१९ 'न विकारित्वमविरोधश्च' इति प्र.रा.वे.पाठेषु। 'न विकारत्वमविरोधश्च' ह.पाठः तत्त्वप्रदीपसम्मतः। 'नान्नमयादीनां विकारत्वम्' इति तदुक्तेः। तदनुसारेण टीकायामपि तथैव पाठस्संभाव्यते। न विकारित्वमर्थोऽपि तु प्राचुर्यमेवेति निश्चीयते इति टीकायां विकारित्वशब्दप्रयोगेन तथैव पाठस्संदिह्येतापि। तथैव 'जगतस्त्वविकारत्व उक्तन्यायेन साधिते' इत्यादौ सुधायामपि अविकारत्वपदमेव पठितम्।

५२.पृ.२० 'मन्त्रवर्णलक्षितं परमेव ब्रह्म' प्र.रा.पाठौ। 'मन्त्रवर्णलक्षितमेव ब्रह्म' इति ह.पाठः टीकादृतपाठापेक्षया भिन्नः। तत्र स्पष्टं परशब्दोपादानात्। तत्त्वप्रदीपपाठस्तु न स्पष्टः।

५३.पृ.२० 'सन्दोहो वासुदेवकः। नारायणोऽथ सन्दोहः' इत्युभयत्र सन्दोहशब्दः पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे तु 'सन्देहः' इत्युभयत्रापि। भावदीपे 'सन्दोहः' इत्येवोपात्तः। टीकायां किमपि न निश्चीयते।

५४. पृ.२० 'इति सूचयित्वा' इति प्र.रा.वे.पाठाः। ते टीकानुगुणाः, 'सूचना = संक्षिप्योक्तिः' इति व्याख्याकृतः। ह.पाठे 'इति सूत्रयित्वा' इति।

५५.पृ.२१ 'अथ सोऽभयं गतो भवति' इति प्र.रा.वे.पाठाः। ह.पाठे तु तन्नास्ति। तत्त्वप्रदीपादृतपाठापेक्षया टीकादृतपाठापेक्षया च भिन्नः सः। तत्र तस्य व्याख्यातत्वात्।

५६.पृ.२१ 'इत्यादिश्रुतिविरोधः' इति प्र.रा.पाठौ। ह.पाठे तु 'इत्यादिविरोधः' इति। वेदगर्भीयेऽपि तथैव दृश्यते।

५७. पृ.२१ 'यतो जगत्स्थाननिरोधसंभवः' इति पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे नास्ति। तत्त्वप्रदीप-टीकादृतपाठापेक्षया भिन्नः सः। तत्र तस्य व्याख्यानात्।

५८.पृ.२१ 'निस्सङ्गेनापि कर्मणा' इति पठ्यते प्र.रा.वे.पाठेषु। ह.पाठे तु न। तत्त्वप्रदीपे संपूर्णतया उपात्तोऽपि अयं भागः न व्याख्यातः। नापि टीकायां व्याख्यातः। ह.पाठ एव श्रेयान्।

५९.पृ.२१ 'जुष्टं यदा पश्यत्यन्यमीशम्' इत्यादि पठ्यते प्र.रा.वे.पाठेषु। 'अन्यमीशम्' इत्यादिरेव ह.पाठे पठ्यते। तत् तत्त्वप्रदीप-टीकादृतपाठापेक्षया भिन्नः। तत्र तस्य व्याख्यानात्।

६०.पृ.२२ 'सर्वान्तर्यामिकः' इति प्र.रा.वे.पाठाः। 'सर्वान्तर्यामकः' इति ह.पाठः।

६१. पृ.२२ 'प्रमादात्मकत्वाद्बन्धस्य' इति प्र.रा.वे.पाठाः। 'प्रमादात्मकत्वाच्च बन्धस्य' इति ह.पाठः तत्त्वप्रदीपादृतपाठापेक्षया भिन्नः।

६२.पृ.२३ 'सोऽश्नुते सर्वान्कामान्' इति प्र.रा.वे.पाठाः। ह.पाठे तु नास्ति। तत् टीकाविरुद्धम्।

६३.पृ.२३ 'अन्तस्समुद्रे' इति प्र.रा.वे.पाठाः। ह.पाठे 'अन्तः' इति नास्ति। तत्त्वप्रदीपे तदुपादानात्, टीकायां व्याख्यानाच्च, तत्त्वप्रदीप-टीकादृतपाठापेक्षया भिन्नः सः।

६४. पृ.२४ 'ब्रह्मान्वविन्दद्दश होतारमर्णे' इति प्र.रा.वे.पाठेषु। ह.पाठे नास्ति। तत् विरुद्धम्। टीकायां व्याख्यानात्, तत्त्वप्रदीपे उपादानाच्च।

६५.पृ.२४ 'विचक्षते मरीचीनां पदमिच्छन्ति वेधसः' इति प्र.रा.वे.पाठेषु। ह.पाठे नास्ति। तत्त्वप्रदीप-

---

[6] कस्तर्हि इत्याशङ्क्य संगत्यर्थमुदाहृतसूत्रप्रतिज्ञाभागं व्याचष्टे - तदेवेति । इति टीकायाः व्याख्यानमेतत्।

टीकादृतपाठापेक्षया भिन्नः सः। तत्र एतस्य व्याख्यानात्।
६६.पृ.२४ 'इति चतुर्वेदशिखायाम्' इति प्र.रा.पाठौ। 'इति च चतुर्वेदशिखायाम्' इति ह.पाठः ग्राह्यः।
६७.तथा 'भेदव्यपदेशाच्चान्यः' इति सूत्रे भाष्ये 'देवानां हृदयं ब्रह्मान्वविन्ददित्यादिभेदव्यपदेशात्' इतीदानीं पठ्यते। परन्तु भाष्यस्वारस्यात् 'देवानां हृदयं ब्रह्मन्वविन्दन् इत्यादि' इत्येव पाठेन भाव्यम् इति भाति। 'भेदव्यपदेशात्' इत्यंशो व्यर्थः। 'इत्यादि' इति भाष्यस्य 'भेदव्यपदेशात्' इति सोत्रपदेनान्वयसंभवात्। तथैव बहुत्र भाष्याच्च।
६८.पृ.२४ 'इत्याकाशस्यानन्दमयत्वे' इति प्र.रा.वे.पाठाः। 'इत्याकाशस्यानन्दत्वे' इति ह.पाठे। न किमपि निश्चीयते।
६९. पृ.२५ 'परो मात्रया तन्वा वृधान' इत्येवान्मात्रमेव पठ्यते प्र.रा.वे.पाठेषु। 'न ते महित्वमन्वश्नुवन्ति' इति सर्वोऽपि भागः पठ्यते ह.पाठे। नात्र विनिगमकम्।
७०.पृ.२५ 'तस्यैव हि तल्लिङ्गम' इति प्र.रा.पाठौ। 'तस्य हि तल्लिङ्गम्' इति ह.पाठे।
७१. पृ.२५ 'इति ब्राह्मे' इति प्र.रा.पाठौ। 'इति च ब्राह्मे' इति ह.पाठे।
७२.पृ.२७ 'गायति त्रायति च' इति प्र.रा.पाठौ। 'गायति च त्रायति च' इति ह.पाठे। 'त्रायते चेति पाठान्तरम्' इति वेदगर्भीयम्। तत्त्वप्रदीपानुगुणः ह.पाठो दृश्यते। टीकायां न स्पष्टम्। अडयार्मातृकास्थवे.पाठोऽपि तत्त्वप्रदीपानुगुणः।
७३.पृ.२७ 'देवाभिधो ह्यसौ। सर्वलोकाभिधो ह्येषः' इति प्र.रा.वे.पाठाः। उभयत्र हिशब्दस्थाने अपिशब्दः ह.पाठे समीचीनो भाति।
७४. पृ.२७ 'पाद इति' इति प्र.रा.पाठौ। 'पाद इति च' इति च शब्दोऽधिकः ह.पाठे। नात्र विनिगमकम्।
७५. पृ.२७ 'इतिवद्भिन्नं च' प्र.पाठः। 'इतिवद्भिन्नं च शब्दात्' इति रा.पाठः प्रामादिक इव भाति।
७६.पृ.२८ 'विष्णुत्वं न विद्यते' इति ह.रा.पाठौ। 'विष्णुत्वं न युज्यते' इति वे.पाठः। भावदीपेऽपि तथा। वे.पाठः अर्थानुगुणः शब्दानुगुणश्च।
७७. पृ.२९ 'सर्वशास्तृत्वहेतुतः' इति प्र.रा.वे.पाठाः। 'सर्वशास्तृत्वतो हरिः' इति ह.पाठः। 'शास्तृत्वतः' इति भावदीपे प्रतीकं गृह्यते। तदनुसारेण 'सर्वशास्तृत्वतो हरिः' इत्येव युक्तः इति भाति।
७८. पृ.२९ 'इति पाद्मे' प्र.रा.पाठौ। 'इति च पाद्मे' इति ह.पाठः।
७९.पृ.३० 'इति ब्रह्माण्डे' प्र.रा.पाठौ। 'इति च ब्रह्माण्डे' इति ह.पाठः।

तदेवं प्रत्येकशः विचारितेषु पाठभेदेषु एतन्निश्चीयते हृषीकेशतीर्थीय एव वा रामचन्द्रतीर्थीय एव वा न सर्वात्मना मूलपाठ इति। ह.पाठः अनेकत्र टीकादृतपाठापेक्षया भिन्नः। सप्तदशवारं तत्त्वप्रदीपादृत-पाठापेक्षया भिन्नश्च। ते च पाठाः (अत्र निर्दिष्टसंख्यानुसारेण) ५,१०,१८,१९,२२,२३,३३,३८,४१,५०, ५५,५७,५९,६१, ६३,६४, ६५ इत्येतत्संख्याकाः पाठाः तत्त्वप्रदीपादृतपाठापेक्षया भिन्नाः ह.पाठे दृश्यन्ते। यद्यपि ह.पाठः अनेकत्र तत्त्वप्रदीपानुगुण एव। तथापि अनुगुणपाठवत् भिन्नपाठोऽपि बहुत्र दृश्यते। एवं स्थिते कथं तत्त्वप्रदीप-टीकादृतपाठापेक्षया भिन्नपाठस्य मूलपाठता?

एवमपि यदि ह.पाठस्य मूलपाठता, तर्हि मूलपाठद्वयं भवेत्। त्रिविक्रमपण्डिताचार्याणाम् आचार्याज्ञया टीकाकरणात्, अवश्यं भगवत्पादसम्मततया वाच्यत्वात्। सर्वत्र च तत्त्वप्रकाशिका तत्त्वप्रदीपमनुसरति। क्वचिच्च 'इति संप्रदायविदः' इति त्रिविक्रमार्यानुल्लिखति च। नातः टीकायामस्ति दोषसंभावनालेशोऽपि। तथा हृषीकेशतीर्थानामपि आचार्यशिष्यत्वात् तत्पाठः आचार्यसंमतः अवश्यं भवेत्। क्वचिच्च विरोधः प्रामादिको भवेत्। तस्मात् मूलपाठद्वयमङ्गीकरणीयं विद्वद्भिः। यथा च अनेकत्र गोविन्दाचार्यैः स्वकीयपादटिप्पणीषु दर्शितम्।

एवमेव अक्षोभ्यतीर्थीयत्वेन प्रचारम् इदानीमेव प्राप्तः वस्तुतः रामचन्द्रतीर्थीयः पाठस्तु प्रचलितपाठस्यैव शाखाविशेषः। अनेकत्र टीकाननुगुणत्वात्। अनेकत्र प्रामादिकत्वाच्च। पूर्वोक्तरीत्या नापि तस्य पाठस्य अक्षोभ्यतीर्थलिखितत्वे प्रमाणम्।

उपसंहारः

तदेवं ज.पाठ-ह्पाठयोरविरोधसंपादनसंभवात् मूलपाठद्वयं प्राचीनकालादारभ्य आसीत् इत्यवश्यमङ्गीकर्तव्यम्। तदेवं संकीर्णबुद्धीनामस्माकमाचार्य एव शरणमित्युपरम्यते।

नैतत् परावधीरणया लिखितम्, किन्तु श्रद्धाजाड्यात्। तथोक्तं टीकाकृद्भिः-'न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधिया न मात्सर्यावेशान्न च चपलतादोषवशतः। परं श्रद्धाजाड्यादकृषि कृतिराचार्यवर्चसि स्खलन्नप्येतस्माज्जगति न हि निन्द्योऽस्मि विदुषाम्।।' इति।

यद्विद्याधीशगुरोः शुश्रूषान्या न रोचते तस्मात्।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा।।
दुर्वादिध्वान्तरवये वैष्णवेन्दीवरेन्दवे।
श्रीराघवेन्द्रगुरवे नमोऽत्यन्तदयालवे।।

१. परिशिष्टम्

प्र.ह.पाठयोः सूत्रपाठभेदाः

१. 'क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्' (१-३-९-३५) इति प्र.पाठः। 'क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्' इति ह.पाठः। परन्तु ह.पाठेऽपि 'क्षत्रियत्वावगतेश्च' इति भाष्यस्य सूत्राननुसारित्वप्रसङ्गः। सूत्रानुसारिणा हि भाष्येण भाव्यम्।

२. 'एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः' (२-१-४-१३) इति प्र.पाठः। 'एतेन शिष्टाऽपरिग्रहा अपि व्याख्याताः' इति ह.पाठः।

३. 'युक्तेश्च' इति सूत्रं ज.पाठे 'ज्ञोऽत एव' इत्यधिकरणे वर्तते (२-३-१०-१८)। परन्तु ह.पाठे नास्ति, तद्वाक्यं भाष्यत्वेन पठ्यते (द्र० गो.टि. पृ.९७)।

४. 'स्मरणाच्च' इति सूत्रं ज.पाठे (३-१-१३-२३)। ह.पाठे नास्ति। भाष्यत्वेन पठ्यते।

५. तथा 'दर्शनात्' इति ज.पाठः (३-२-१७-३३), 'दर्शनात्तु' इति ह.पाठः।

६. 'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (३-३-२-७) इति यद्यपि सूत्रस्य मुद्रितः प्र.पाठः। चशब्दो नास्ति ह.पाठे। तथापि कुत्रापि तस्य व्याख्यानाभावात् नात्र गोविन्दाचार्यदर्शितदिशा पाठभेदावसरः।

७. 'प्रदानवदेव हि तदुक्तम्' (३-३-२६-४४) इति प्र.पाठः। हिशब्दो नास्ति ह.पाठे।

८. 'शब्दश्चातोऽकामचारे' (३-४-४-३१) इति मुद्रितः प्र.पाठः। 'शब्दश्चातोऽकामकारे' इति ह.पाठः।

९. 'आप्रायणात्' इति ज.पाठः (४-१-७-१२), 'आप्रयाणात्' इति ह.पाठः।

१०. 'समना चासृत्युक्रमादमृतत्वं चानुपोष्य' (४-२-६-७) इति प्र.पाठः। ह.पाठे तु 'समना' इति पदं 'समानाम्' इति पठ्यते। मुद्रणदोषो भवेत्। न कापि टिप्पणी दृश्यते।

११. 'तदपीतेः संसारव्यपदेशात्' (४-२-६-८) इति ज.पाठः। 'तदापीतेः संसारव्यपदेशात्' इति ह.पाठः।

१२. 'अतश्चायनेऽपि हि दक्षिणे' (४-२-९-२१) इति प्र.पाठः। हि शब्दो नास्ति ह.पाठे।

२. परिशिष्टम्

जयतीर्थग्रन्थेषु उल्लिखिताः पाठभेदाः

स्वग्रन्थेषु जयतीर्थैरुल्लिखिताः पाठभेदाः प्रायः ह.पाठे उपलभ्यन्ते। तत्र ह.पाठस्य पृष्ठसंख्या निर्दिष्टा। आहत्य पञ्चदशपाठभेदेषु नव तत्र लभ्यन्ते।

ते **अनुव्याख्यानन्यायसुधायां** षड् यथा-

१. 'एतमेव तथा सन्तं शतर्चोत्यादिनामभिः।
आचक्षत इति ह्यत्र सन्तमित्यवधारणा।।'

सुधा 'अवधारणेति क्वचित्पाठः' (सु.१९१८) ('अवधारणात्' इति ह.पाठः, पृ.५३)।

२. 'ऐक्यप्रतीत्यभावेन भेद एव गवाश्वयोः।
स एवेति प्रतीतौ हि विशेषो नाम भण्यते।।'

सुधा 'गवश्वयोरिति प्रमादपाठः। मूलकोशेष्वदर्शनात्।' (सु.४६९०)('गवश्वयोः' इति ह.पाठः, पृ.१४१)

३. 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम्।
फलं मोक्ष इति प्रोक्त क्रमात् पादेषु चोदितः।।'

सुधा 'क्वचित्पाठः प्रोक्तमित्युदितमिति च। तत्र यथास्थान एव इतिशब्दः। आद्ये मोक्षानुवादेन

फलचतुष्टयात्मकत्वं । द्वितीये तु विपर्ययेण।' (सु.५४३९) (अत्र परं ह.पाठेऽपि एवमेव पठ्यते (२००) क्काचित्कः पाठः ह.पाठे नास्ति।)

४. 'शिरःकराद्यैरपि मुक्तिभाजो युक्ता यतस्ते पुरुषा इदानीम्।
यथेतिपूर्वा अनुमाश्च जीवस्वरूपमङ्गादिकमावयन्ति।।'

सुधा 'आवयन्तीति करणे कर्तृत्वोपचारः। आपयन्तीति क्वचित्पाठः' (सु.५६०५)। ('अङ्गादियुगापयन्ति' इति ह.पाठः, पृ. २०४)

५. 'व्यवस्थितिस्त्वविशेषस्थितिश्च निषेधसामान्यविधिक्रियाणाम्।
विभक्तता चात्वरयैव सिद्धिर्विपक्षसम्प्राप्तिविरोधहेतवः।।'

सुधा 'विपक्षसम्प्राप्तिविरुद्धहेतव इति क्वचित्पाठः। तत्र सम्प्राप्तिशब्दः करणसाधनः' (सु.५६१९)। ('संप्राप्तिविरुद्धहेतवः' इति ह.पाठः, पृ.२०५)।

६. 'केवलं तु कथा वादो जल्पोऽर्थादिव्यपेक्षया।
सतामेव कथा ज्ञेया वितण्डा त्वसतां सताम्।।'

'उभाभ्यां साधनं चैव दूषणं वादजल्पयोः।
सद्भिरागम एवैकः प्रयोज्योऽभीष्टसाधकः।।'

सुधा 'क्वचित्सतामेवेत्यादिसार्धश्लोको वादजल्पयोरित्यतः परं पठितः। तत एतामेव सङ्गतिमाश्रित्य टीकाकृता तत्रैव व्याख्यातः।' (अत्र एवं क्काचित्कः पाठः ह.पाठे नास्ति। स च क्काचित्कपाठः टीकोल्लिखितप्रकारेण सन्न्यायरत्नावल्यां लभ्यते।)

गीताभाष्यप्रमेयदीपिकायां पञ्च यथा

१. 'कामः स्वल्पः कादाचित्कोऽपि इति मूलपाठः' (६.२४, पृ.२९६[४६])। (ह.पाठेऽपि मूलपाठवदेव वर्तते पृ.६९)।

२. 'क्वचित्पाठो मद्भावं मद्वद्भावम् इति' (८.५, पृ.३५०)। ('मद्भावं मद्वद्भावम्' इति ह.पाठः, पृ.८२)।

३. 'अत्रात्मकमिति पाठः'[४७] (८.५, पृ.३५०)। (ह.पाठेऽपि 'आत्मकम्' इत्येव वर्तते, पृ.८२)।

४. 'भाष्ये पुराणे च अनुष्ठायेत्याकारस्थाने क्वचिदीकारो लेखकदोषेण पतितः, मूलकोशेष्वदर्शनात्' (८.२८, पृ. ३६८)। (ईकारघटितः पाठः ह.पाठे, पृ.८७-८८)।

५. 'कर्म हेतु इति क्वचित्पाठः' (१८.१६[४८], पृ.५६७)। ('कर्म हेतु' इति पाठः ह.पाठे पृ.१५३)।

तत्त्वनिर्णयटीकायाम् एकत्र यथा

तत्त्वनिर्णयटीका 'इतः परं प्रत्यक्षानुमानसिद्धत्वे च इत्यतःपूर्वं वाक्यद्वयं मूलकोशेष्वदर्शनात्प्रक्षिप्तमित्याहुः। तथापि गङ्गाजलानुप्रविष्टक्षुद्रनदीजलस्येव तस्याप्युपादेयत्वात् तद्व्याख्यानं क्रियते।' (प्र.परिच्छेदे, पृ.३२३[४९])। (अत्र तु मूलकोशेष्वदर्शनात् 'विमतं सकर्तृकं कार्यत्वात्' इत्यादिवाक्यद्वयं प्रक्षिप्तमिति निश्चये सत्यपि व्याख्यानं जयतीर्थानामभिमतम्। एतेनैव हेतुना

---

[४६] रुचिराचार्यमुद्रितपुस्तकस्य पृष्ठसंख्या।

[४७] 'आत्मकम्' इति मूलपाठः इति वा, क्वचित्पाठः इति वा कोऽस्यार्थः कः इति न ज्ञायते। परन्तु रुचिराचार्यमुद्रितायां प्रमेयदीपिकायां आत्मिकाम् इति पाठो दृश्यते।

[४८] गो.पुस्तकरीत्या १८-१५।

[४९] एतत्तु मध्वराद्धान्तसंवर्धकसभाप्रकाशितपुस्तकस्य पृष्ठसंख्या। गो.पुस्तकस्य तु भाग.५.पृ.६।

पद्मनाभतीर्थविरचितटीकायां तद्व्याख्यानं वर्तते। वाक्यद्वयस्यापि व्याख्यानं नारायणपण्डिताचार्यकृतायां टीकायां नास्ति। नारायणपण्डिताचार्याभिप्रायमेव[५०] जयतीर्था अनुवदन्तीति ऊह्यते। अथ वा स्वगुरूणामक्षोभ्यतीर्थानम्, अन्यथा सुधायामिव तन्मतं केचित् इत्येवानूदितं स्यात्। परन्तु ह.पाठे आदिमम् एकं वाक्यं लभ्यते। पाठकाले आचार्यैः अनुमानस्य नियतप्रामाण्याभावसाधनसंदर्भे प्रसङ्गात् विमतं सकर्तृकं कार्यत्वात् इत्याद्यनुमानस्य दूषणमेवं कर्तुं शक्यते इत्युक्तमेव कैश्चिच्छिष्यैः ग्रन्थस्थतया व्याख्यातम्, कैश्चिच्च ग्रन्थस्थतामनभ्युपगम्य प्रासङ्गिकतया तत्त्यक्तं भवेत् इति।

अत्रेदमवधेयम्- जयतीर्थैः पद्मनाभतीर्थपाठः संप्रदायश्च बहुत्रादृतोऽपि अनेकत्र अन्यः पन्थाः अनुसृतः। सुधायाम् अनेकवारं टीकाकृतां[५१] पद्मनाभतीर्थानां पक्षः प्रकारान्तरेण व्याख्यातः, तथा वादो जल्पो वितण्डा इति अनुव्याख्यानव्याख्यावसरे च टीकाकृतां क्वाचित्कपाठावलम्बनं च निरूपितम्। तथापि नास्ति प्राचीनटीका-नवीनटीकयोः विरोधः। प्रायः तदनुसारेण प्रवृत्तत्वात्। जयतीर्थैश्च उल्लिखितः मूलकोशश्च अन्य एव आसीत्, यः पद्मनाभतीर्थोपयुक्तादन्यः।

तत्त्वनिर्णयटीकायां च 'मूलकोशेष्वदर्शनात् प्रक्षिप्तमित्याहुः' इति मूलकोशेष्वदर्शनं न पराभिप्रेतमनूद्यते, किन्तु मूलकोशेष्वदर्शनं स्वस्याप्यभिमतमेव, किन्तु तत्र प्रक्षिप्ततया अव्याख्यातव्यत्वमेव पराभिप्रेतमनूद्यते। अन्यत्र सुधायामपि मूलकोशोल्लेखात्।)

प्रमाणलक्षणटीकायां द्वयं यथा

१. 'अशेषगुरुमीशेशम्' (प्र.ल)। 'सर्वज्ञं गुरुमिति पाठे सार्वज्ञ्यं गुरुत्वस्योपपादकम्' (पृ.१[५२])

२. 'योगिज्ञानमृजूनामनादिनित्यम्' (प्र.ल)। 'योगिज्ञान इति पाठे ज्ञानमिति शेषः' (पृ.२३) (ह.पाठे एवम्)।

गीतातात्पर्यन्यायदीपिकायाम् एकं यथा-

'कर्तृत्वं द्विविधं प्रोक्तं विकारश्च स्वतन्त्रता।
विकारः प्रकृतेरेव विष्णोरेव स्वतन्त्रता।।

इति पैङ्गिश्रुतेः कार्यते ह्यवशः इत्यत्र अवशो विष्णुवशः।' (गी.ता.३.५-८, गो.पु.पृ. ३९-४०)

न्यायदीपिका- [५३]'श्रुतिरिति कुत्रचित्पाठः।'

---

[५०] इदमत्रावधेयम्। सुधायामपि स्थलद्वये जिज्ञासाधिकरणे समुदायाधिकरणे च केचित् इत्यनुवदन्ति जयतीर्थाः। ते च केचित् नारायणपण्डिताचार्याः एव। पद्मनाभतीर्थानां टीकाकारत्वेन जयतीर्थैरुल्लेखात्। अन्यस्य च टीकाकर्तुरभावात्।

[५१] अत्रेदमवधेयम्। जयतीर्थैः यत्र कुत्रापि स्वकीयानां व्याख्याग्रन्थानां केवलं टीका इति नाम न सूचितम्। केवलं व्याख्या इति, पञ्चिका इति, विवरणम् इति, विषमपदवाक्यार्थविवरणम् इति वा नामनिर्देशः कृतः।

[५२] एतत्तु मध्वराद्धान्तसंवर्धकसभाप्रकाशितपुस्तकस्य पृष्ठसंख्या।

[५३] 'श्रुतिरिति क्वचित्पाठः' इत्यतः पूर्वम् एतत् पठ्यते- 'कार्यत इत्यत्र स्वतन्त्रकर्तुरन्यस्याप्रतीतेः प्रकृतिगुणानामेव स्वतन्त्रकर्तृत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह।। कर्तृत्वमिति।। अत्र गुणानां विकारकर्तृत्वमेवोच्यते। न तु स्वतन्त्रकर्तृत्वम्। अवश इति विष्णोः स्वतन्त्रकर्तृत्वोक्तेः। अवशपदेन स्वानधीनत्वं गृहीत्वा गुणानां स्वतन्त्रकर्तृत्वमेव किं न गृह्यत इति चेन्न। 'कर्तृत्वम्' इति श्रुतिविरोधादिति भावः।'

३.परिशिष्टम्

'गवाश्वयोः' इति प्रयोगविषये वैयाकरणानामाशयः

प्रो.वि.वेंकटराजशर्मणामाशयः[५४]

- 'गवाश्वयोः' इत्यपि प्रयोगः पाणिन्यनुसारेण साधूकर्तुं शक्यते। तथा हि 'अधिकरणैतावत्त्वे च' इति सूत्रेण समाहारघटकपदार्थद्रव्यसंख्यावगमे एकवद्भावो निषिध्यते। दश दन्तोष्ठाः इत्युदाहरणम्। एवमत्रापि द्वयोरिति प्रकरणबलादध्याहाराद्वा लभ्यते इति 'गवाश्वयोः' इति साध्वेव।
- 'गवश्वयोः' इति मूलपाठो न युक्तः। अवङादीनाम् ('एङः पदान्तादति', 'सर्वत्र विभाषा गोः', 'अवङ् स्फोटायनस्य' इत्येतेषाम्) अयादेशबाधकत्वात्। न हि पदान्तादेकाराद् ओकाराद्वा अकारे परे 'एचोऽयवायावः' इत्यनेन अयादेशः क्वापि दृश्यते।
- गवयादिः अव्युत्पन्नं प्रातिपदिकम्। यथाकथंचित् तत्र तदङ्गीकारेऽपि प्रसिद्धे गवाश्वादिशब्दे तत्कल्पनस्य अन्याय्यत्वात् तन्न युक्तम्।
- सारस्वतव्याकरणेन अवर्णागमाभावेऽपि अव् इत्यादेशो न भवति। 'एङः पदान्तादति' इति पूर्वरूपेण बाधात्। तथा च गोऽश्वयोः इत्येव स्यात्।
- सारस्वतव्याकरणेन गवाश्वमिति रूपाभावे 'गवाश्वप्रभृतीनि' इति सूत्रकारनिर्देशोऽसंगतस्स्यात्। पाणिनेः अवङेव सारस्वतव्याकरणे अवर्णागमः[५५]।
- किं च सारस्वतव्याकरणे एवं सति गवेडकम्, गवाविकम् इत्यादिषु द्वन्द्वेषु किं भवति ?।
- श.व्रा.चं.व्याख्योक्तरीत्या गवाश्वं च गवाश्वं च गवाश्वे तयोः गवाश्वयोः इति रूपसंभवेऽपि तत्र अर्थसंगतिश्चिन्त्या।
- यदि च विभाषात्वाद् अवङ् न भवति, तदा गोऽश्वयोः इति वा, गोअश्वयोः इति वा भवेत् न तु गवाश्वयोः इति, यथा 'अपशवो वा' इति वेदे 'गोअश्वाः' इति[५६]।

अत्र प्रो.वि.श्रीवत्साङ्काचार्याणामाशयः[५७]

- यदा 'गवाश्वम्' इति रूपं विवक्षितम्, तदानीमेव तस्य शब्दस्वरूपस्य तथैव 'गवाश्वप्रभृतीनि च' (२-४-११) इति गणे पाठमभ्युपगम्य तस्य साधुत्वं सूत्रेणाभ्युपगतम्। यथा तु स्फोटायनस्य मतेन 'गो अग्रम्' इत्यत्र 'गोअग्रम्', 'गवाग्रम्' इति अवङादेशविकल्पविधानात् रूपद्वयम्, तद्वत् अत्रापि 'गोः अचि परे अवङ् वा स्यात्' इत्याश्रित्य गो अश्व इति द्वित्वविशिष्टयोः द्विवचनेनैव निरूप्यत्वेनाभीष्टयोः विवक्षा तदानीं द्विवचनं निराबाधम्। पाक्षिकेऽवङि, सवर्णदीर्घे, द्वित्वे विवक्षिते द्विवचनस्य सामञ्जस्यात्। 'अधिकरणैतावत्त्वे च' इति सूत्रेण इयत्तानिर्धारणे एकवद्भावप्रतिषेधात्।
- 'गवाश्वप्रभृतीनि च' (२-४-११) इति गणे ये गवाश्वम् इत्यादयः शब्दाः पठिताः, ते गवां च अश्वानां च समाहारः इति वृत्तिमाश्रित्य प्रत्येकव्यक्तिबहुत्वे विवक्षिते एव, वृत्तिबलादेकवद्भावेन पठिताः इत्यवधेयम्। प्रकृते तु गोव्यक्तेः, अश्वव्यक्तेश्च एकस्या एव प्रत्येकं विवक्षणात्, समुदिते द्विवचनं

---

[५४] प्रो.वि.वेंकटराजशर्मा, तिरुवनन्तपुरस्थसंस्कृतमहाविद्यालयस्य व्याकरणाध्यापकाः, भूतपूर्वप्रधानाचार्याश्च, इदानीम् एकोल् प्रांकायिस् ड एक्स्ट्रीम् ओरियण्ट् संस्थायां संमानितप्राध्यापकाः, पाण्डिचेरि।

[५५] अवर्णागमः इति न अवर्णरूप आगमः, किन्तु अवर्णस्य आगमः। स्वैरम् इत्यादिषु ऐकारागदर्शनात्।

[५६] पूर्वरूपपक्षे गोऽश्वम्, गोऽश्वाः इति। एतत् लघुशब्देन्दुशेखरे गवाश्वप्रभृतीनि इति सूत्रे दृश्यते। (द्वितीयभागे पृ.१३५)।

[५७] प्रो.वि.श्रीवत्साङ्काचार्याः मद्रपुरीयसंस्कृतकलाशालायाः प्राक्तनव्याकरणाध्यापकाः, मुख्याचार्याश्च। इदानीं पाण्डिचेरि फ्रेञ्च् इन्स्टिट्यूट् संस्थायां संमानितप्राध्यापकाः। पाण्डिचेरि।

निराबाधमेव। 'अभिधानलक्षणाः कृत्तद्धितसमासान्ताः' इति न्यायस्याश्रयणात्, कुमारिलप्रभृतिभिः सर्वसंमतैः शिष्टैः 'गवाश्वयोः' इत्यस्याभिहितत्वात् नात्रासाधुत्वं शङ्कनीयम्। यत्र समाहारद्वन्द्वः तत्रैव 'स नपुंसकम्' इति प्रारभ्य 'गवाश्वप्रभृतीनि च' इति सूत्रम्। तस्मात् समाहारद्वन्द्वे एव एकवद्भावः, न तु इतरेतरद्वन्द्वे।

- 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति परिभाषया सर्वस्यापि द्वन्द्वस्य 'सर्वः प्लुतो विकल्प्यते' इत्यत्रेव पाक्षिकत्वादपि प्रयोगोऽयं साधुः। 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः, सह वा निवृत्तिः' इत्यभिधाय 'क्वचिदेकदेशोऽप्यनुवर्तते' इत्यत्रेव, अत्र 'क्वचित्' इत्यनुक्त्वा 'सर्वो द्वन्द्वः' इति सर्वशब्दश्रवणात् सर्वेषामपि द्वन्द्वानां[५८] ग्रहणादपि अस्य प्रयोगस्य साधुत्वमवश्यमेष्टव्यम्। अन्यथा 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः' इत्युक्त्वा 'उभयगतिरिह क्वचिद्भवति' इति यथा निर्दिष्टम्, तथा अत्रापि 'क्वचित्' इत्युक्तं स्यात्। न चोक्तम्। तेन ज्ञायते —— यः कोऽपि द्वन्द्वः विभाषया एकवद्भावं लभते, पक्षे यथाप्राप्तं वचने इति। महाविभाषया यथा वा समास-विग्रहवाक्ययोः पाक्षिकत्वम्, एवं महाविभाषया यथा वा तद्धितप्रत्ययानां वैकल्पिकत्वात् पक्षे तदर्थवाक्यसाधुत्वम्, तथा अत्रापि इति निष्कर्षः।
- 'येषां च विरोधः शाश्वतिकः' (२-४-९) इति सूत्रे 'चकारः पुनः अस्यैव समुच्चयार्थः। तेन पशुशकुनिद्वन्द्वे विरोधिनाम् अनेन नित्यम् एकवद्भावो भवति - अश्वमहिषम्, श्वसृगालम्, काकोलूकम्' इति काशिका। तेन ज्ञायते —— यत्र पशुद्वन्द्वे शाश्वतिकविरोधो न तत्र नित्यम् एकवद्भावः, अपि तु पाक्षिकः इति। तेनाप्यत्र 'गवाश्वयोः' इति रूपं साध्वेव। न हि अश्वमहिषयोरिव गोः अश्वस्य च शाश्वतिको मिथो विरोधः।
- 'गवाश्वप्रभृतीनि कृतैकवद्भावानि गणे पठ्यन्ते। तेषामनेन साधुत्वमात्रं विधीयते, न त्वेकवद्भावः इति दर्शयन्नाह- गवाश्वादीनि इति' इति न्यासस्य, 'गवाश्वप्रभृतीनि कृतैकवद्भावान्येव पठ्यन्ते, तेषामनेन साधुत्वमात्रं विधीयते, न त्वेकवद्भावः इत्याह- गवाश्वप्रभृतीनि इति' इति पदमञ्जर्याश्च सम्यगध्ययने, एकवद्भावविधायकं, नियामकं वा नेदं सूत्रम्, अपि तु गवाश्वम् इति इत्येकवद्भावघटितप्रयोगाणां साधुत्वान्वाख्यानपरम् इति ज्ञायते। तेनापि द्विवचनोपपत्तिरभ्यूहितुं शक्या[५९]।

'गवाश्वयोः' इति सुधाप्रयागः साधुरेव हि।
पश्चात्र कारणानीति श्रीवत्साङ्केन दर्शितम्।।

अत्र विद्वान् जि.महाबलेश्वरभट्टानामाशयः[६०]

'गवाश्वम्' इति शब्दविषये प्रस्तूयते किंचित्। तथा हि- गौश्च अश्वश्च अनयोः समाहारः गवाश्वम्। गावश्च अश्वाश्च एतेषां समाहारः गवाश्वम्। 'गवाश्वप्रभृतीनि च' (२-४-११) इति सूत्रेण एकवद्भावः। 'यथोच्चारितं द्वन्द्ववृत्तम्' इति सूत्रेऽस्मिन् विद्यमानं वार्तिकम्। द्वन्द्वप्रयुक्तमिदं कार्यं गणे यथोच्चरितशब्दविषयम् इति वार्तिकस्यार्थः। अस्मिन् वार्तिके कैयटोऽप्याह - 'गणे यादृशाः कृतावङः पठिताः द्वन्द्वास्तादृशानामेवेदं कार्यमेकवद्भावलक्षणं भवतीत्यर्थः। यदा त्ववङ् नास्ति विकल्पितत्वात् तदा पशुद्वन्द्वे विभाषा भवति, गोऽश्वं गोऽश्वाः इति। एतेन गणपाठरूपं विवक्षितमित्युक्तं भवति' इति।

---

[५८] समाहारद्वन्द्वानां, तत्रापि यन केनापि सूत्रेण उत्सर्गरूपेण, अपवादरूपेण, बाधकबाधकरूपेण वा प्रवृत्तानां सर्वेषामपि द्वन्द्वानां ग्रहणार्थमेव परिभाषायां सर्वशब्दग्रहणम् इति व्यक्तं वैयाकरणनिकाये।

[५९] क्वचिदेतद्धेतुं नाङ्गीकुर्युः, तथापि हेतुरेवायम्।

[६०] विद्वान् जि.महाबलेश्वरभट्टाः बेङ्गळूरुनगरस्थचामराजेन्द्रसर्वकारीयसंस्कृतकलाशालायां व्याकरणाध्यापकाः। तेषां १४-१२-०२ दिनीयं पत्रम्।

अत्र कृतावङः निर्देशात् 'गवाश्वम्' इत्येव, न तु गवाश्वौ इति। अवङभावपक्षे तु 'विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशु...' (२-४-१२) इति सूत्रेण एकवद्भावस्य विकल्पितत्वात् गोऽश्वम् इति गोऽश्वौ इति च पूर्वरूपे रूपद्वयं भवति। 'सर्वत्र विभाषा गोः' (६-३-१२२) इति प्रकृतिभावपक्षे गोअश्वम्, गोअश्वौ इति च भवति रूपद्वयम्। एवं च गवाश्वम्, गोऽश्वम्, गोअश्वम्, गोऽश्वौ, गोअश्वौ, गोऽश्वाः, गोअश्वाः इति च रूपाणि भवन्ति[६१]।

प्रेषिते पत्रे १४३ पृष्ठे[६२] 'गवाश्वयोः इति प्र.पाठः' इत्यारभ्य 'अत्र स्मर्तव्यम्' इत्यन्ता टिप्पणी अस्फुटा। 'ननु तर्हि कथम्' इत्यारभ्य 'दुरुपपादमेव' इत्यन्तो भागो नावगतः। तत्र कैयटस्य पङ्क्तीनामुद्धरणेऽपि दोषः कृतः। 'कृतावङः' इति पदस्य, 'यदा त्ववङ् नास्ति....' इत्यादिवाक्यस्य च त्यागः कृतः। अतः उद्धृतपङ्क्तिभ्यः कैयटस्य आशयो न ज्ञायते। (कैयटपङ्क्तयः मया उपरि लिखिताः)। सारस्वतव्याकरणमुद्धृतं टिप्पण्याम्। किन्तु कैयट आह - 'नियतकालाश्च स्मृतयो व्यवसायहेतवः। मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभागः' इति। अतः अष्टाध्याय्यनुगृहीतानामेव शब्दानां साधुत्वमद्यत्वे इति वैयाकरणानां समयः।

४. परिशिष्टम्

अनुव्याख्याने हृषीकेशतीर्थीयपाठ-सुधापाठयोश्च उपलभ्यमानाः पाठभेदाः। तत्र सुधाहृतपाठः सु.पाठ इति, हृषीकेशतीर्थीयपाठः हृ.पाठ इति, मुद्रितः अनुव्याख्यानपाठः मुद्रितपाठ इति च निर्दिष्टाः। तत्र सु.पाठः उत्तरादिमठप्रकाशितषट्टिप्पणीसमेतसुधापुस्तकानुसारी, पृष्ठाङ्काश्च तस्यैव पुस्तकस्य। हृ.पाठस्य तु पूर्वोक्तपुस्तकस्य, पृष्ठाङ्काश्च तस्यैव पुस्तकस्य। संमतपाठस्य ● चिह्नम्, विमतपाठस्य च चिह्नम् अत्र दत्तम्।

प्रथमाध्याये

तस्मिन्नेव समस्तस्येतीष्टे इति सु.पाठः (८०७) अस्मिन्नेव समस्तस्येतीष्टे इति हृ.पाठः (५)।
●प्रत्यक्षादिविरोधेऽतो इति हृ.पाठः (६) संमत एव, वाक्यार्थचन्द्रिकायां तथा व्याख्यानात् (८५६)।
न चाशक्त्याभिधायित्वम् इति सु.पाठः (९९२)। न चाशक्याभिधायित्वम् इति हृ.पाठः (६)।
शेषपैलाभ्याम् इति सु.पाठः (१०१६) पैलशेषाभ्याम् इति हृ.पाठः (७)।
नारायणपदोदितः इति मुद्रितपाठः (१०२७) न स्पष्टः। नारायणपदेरितः इति हृ.पाठः (७)।
सत्यज्ञानादिकेऽप्येवम् इति सु.पाठः (११०९) सत्यज्ञानादिकेऽप्येव इति हृ.पाठः (९)।
येऽविद्वांसो बुधो जनाः इति मुद्रितपाठः (१२१०) न स्पष्टः। अविद्वांसो बुधो जनाः इति हृ.पाठः (१२)।
वदन्ति श्रुतयो ब्रह्म इति सु.पाठः (१२४७) वदन्तु श्रुतयो ब्रह्म इति हृ.पाठः (१४)।
●मैव ब्रूयाः कथंचन इति हृ.पाठः (१४) संमत एव (१२४७) श्रीनिवासतीर्थीये तथा दर्शनात्।
सर्वप्रसूतिप्रभवम् इति मुद्रितपाठः (१२८३) न स्पष्टः। सर्वप्रसूतिप्रसवम् इति हृ.पाठः (१४)।
विरूपाक्षाख्यमपरम् इति सु.पाठः (१३०२) विरूपाक्षाख्यमवरम् इति हृ.पाठः (१५)।
अभेदेऽपि विशेषेणैव इति सु.पाठः (१३३६) अभिन्नोऽपि विशेषेणैव इति हृ.पाठः (१५)।
●सोऽयं नारायणो देवः इति हृ.पाठः (१७) पूर्वमेव संमतः (१३६५)।
स एवौषधिनामकः इति मुद्रितपाठः न स्पष्टः (१३७१)। स एवोषधिनामकः इति हृ.पाठः (१७)।

---

[६१] यथाक्रमं द्वित्वे, बहुत्वे च विवक्षिते।
[६२] एतत्तु पृष्ठं गोविन्दाचार्यटिप्पणीसहितसूत्रभाष्यपुस्तकस्य।

शक्तिता व्यक्तिता चेति इति सु.पाठः (१६१६) शक्तिता व्यक्तता चेति इति ह.पाठः (२६)।
●अन्तरः स उदाहृतः इति ह.पाठः (२८) पूर्वमेव संमतः (१६६०)।
ईश्वरश्चेन्नियन्ता स्यात् इति सु.पाठः (१६७३) ईश्वरश्चेन्नियन्ता च इति ह.पाठः (२९)।
स्वात्मनाऽनियतं वस्तु इति सु.पाठः (१६७६) आत्मनाऽनियतं वस्तु इति ह.पाठः (३०)।

तत्रान्यत्र प्रसिद्धानाम् इति सु.पाठः (१७४३) न स्पष्टः, सुधायां चशब्दस्यापि सत्त्वात्। तत्रान्यत्र च सिद्धानाम् इति ह.पाठः (३४)।

ता एव बलवत्यस्तु इति सु.पाठः (१७७१) त एव बलवन्तस्तु इति ह.पाठः (४३)।
अतो दोषातिदूरत्वात् इति सु.पाठः (१८२१) ततो दोषातिदूरत्वात् इति ह.पाठः (४७)।
आयजेतश्चायजेतः इति सु.पाठः (१८३१) आयज्ञेतश्चायजेतः इति ह.पाठः (४९)।
पदवर्णस्वरात्मभिः इति सु.पाठः (१८४२) पदवर्णस्वरादिभिः इति ह.पाठः (५०)।
पूर्वपक्षेषु युक्तयः इति सु.पाठः (१८५६) पूर्वपक्षेषु हेतवः इति ह.पाठः (५३)।
इत्यादियुक्तयः साक्षात् इति सु.पाठः (१८५६) इत्याद्या युक्तयः साक्षात् इति ह.पाठः (५३)।
सिद्धान्तस्थापिका इह इति सु.पाठः (१८५६) सिद्धान्तस्थापका इह इति ह.पाठः (५३)।
सन्तमित्यवधारणात् इति सु.पाठः (१९१८) सन्तमित्यवधारणा इति ह.पाठः (५३)।
गौणाद्यं तदयोगतः इति सु.पाठः (१९५०) गौण्याद्यं तदयोगतः इति ह.पाठः (५४)।

अनिवर्त्योऽन्यथाभवः इति मुद्रितपाठः न स्पष्टः (१९७२) अनिवर्त्याऽन्यथाभवः इति ह.पाठः (५४)।

ह्यप्राप्यत्वाच्च दुर्जनैः इति मुद्रितपाठः न स्पष्टः (२०४०) ह्यप्राप्तत्वाच्च दुर्जनैः इति ह.पाठः (५५)।

भवेदभवदित्यस्मात् इति सु.पाठः (२०४८) भवेदभवदित्याद्यः इति ह.पाठः (५५)।
यच्चाविकृतमेवैकम् इति सु.पाठः (२०५२) यच्चाविकृतमेवैतत् इति ह.पाठः (५५)।

विश्वसत्यत्ववाचिकाः इति मुद्रितपाठः न स्पष्टः (२१०४) विश्वसत्यत्ववाचकाःइति ह.पाठः (५६)।

पराभावेऽपि वाग्व्यर्था इति सु.पाठः (२२३३)। परन्तु सुधानुसारेण पराभावे च इति भाव्यमिति भाति। पराभावे हि वाग्व्यर्था इति ह.पाठः (५६)।
मिथश्च जडभेदोऽयम् इति सु.पाठः (२२४७) मिथश्च जडभेदो यः इति ह.पाठः (५६)।
वाचारब्धं तु सांकेत्यनाम इति सु.पाठः (२२५९) वाचारब्धं तु सांकेत्यं नाम इति ह.पाठः (५६)।
●प्रध्वंसते वाऽयम् इति ह.पाठः (५७) पूर्वमेव संमतः (२२६९)।
न जीर्यते इति सु.पाठः (२२६९) न जीर्यति इति ह.पाठः (५७)।
●विकारत्वविवक्षायाम् इति ह.पाठः (५७) संमत एव (२२७५)।
सर्वं कार्ष्णायसं च स्यात् इति सु.पाठः (२२७८) सर्वकार्ष्णायसं च स्यात् इति ह.पाठः (५७)।
सृष्ट्यादेश्चैष विस्तरः इति सु.पाठः (२२८०) सृष्ट्यादेश्चैव विस्तरः इति ह.पाठः (५७)।

संमतपाठः ७

द्वितीयाध्याये

श्रुतिसाम्यबलोद्भवाः इति मुद्रितपाठः न स्पष्टः (२३१३) श्रुतिसाम्यबलाद्भवाः इति ह.पाठः (५८)।

सिद्धान्तस्य नियामिकाः इति मुद्रितपाठः न स्पष्टः (२३१३) सिद्धान्तस्य नियामकाः इति ह.पाठः (५९)।

नित्य इत्येव गम्यते इति मुद्रितपाठः न स्पष्टः (२३६८) नित्य इत्यवगम्यते इति ह.पाठः (६०)।

साधनं पुनरेव तु इति सु.पाठः (२६८२) साधनं पुनरेव हि इति ह.पाठः (६१)।
एत एव तु निग्रहाः इति सु.पाठः (२७५९) एत एव च निग्रहाः इति ह.पाठः (६१)।

तत्त्वनिर्णयसाधिनी इति मुद्रितपाठः (२७६४)। परन्तु सुधायां °साधनी इति मुद्रितं प्रामादिकं वा इति न ज्ञायते। तत्त्वनिर्णयसाधनी इति ह.पाठः (६१)।

कर्तृत्वमिति निश्चितम् इति सु.पाठः (२८९८) कर्तृत्वमिह निश्चितम् इति ह.पाठः (६३)।

●अभावस्य च भावोऽपि इति ह.पाठः (६३) पूर्वमेव संमतः (२९०४)।

उत्पत्तिनाशकारीं च इति मुद्रितपाठः न स्पष्टः (२९५४) उत्पत्तिनाशकारी हि इति ह.पाठः (६३)।

●जगतस्त्विकारत्वे इति ह.पाठः (६५) पूर्वमेव संमतः (३००८)।

●स्वभिन्नं कारणाभिन्नभिन्नम् ह.पाठः (६६) पूर्वमेव संमतः (३०६४)।

●बीजावपनकर्तेव इति ह.पाठः (७३) संमतो दृश्यते सुधायाः पितृजीवश्चावपनकर्तृस्थानीयः इति व्याख्यानात् (३३०२)।

सर्वैरेवानुभूयते इति मुद्रितपाठः न स्पष्टः (३३३७) सर्वैरप्यनुभूयते इति ह.पाठः (७४)।

हिताक्रियादिदोषाच्च इति सु.पाठः (३३४३) हिताकृत्यादिदोषाच्च इति ह.पाठः (७५)।

वदन्तोऽन्ये इति सु.पाठः (३३४७) वदन्त्यन्ये इति ह.पाठः (७५)।

परमाण्वादिरत्र हि इति सु.पाठः (३३५६) परमाण्वादि तत्र हि इति ह.पाठः (७५)।

नित्यं क्रिया अनित्याश्च इति सु.पाठः (३३५८-६७) नित्यं क्रिया अनित्यास्तु इति ह.पाठः (७५)।

अप्रत्यक्षत्वमेव स्यात् इति सु.पाठः (३३९१) अप्रत्यक्षत्वमेवं स्यात् इति ह.पाठः (७६)।

●कथं त्र्यणुकपूर्वेषु इति ह.पाठः (७६) पूर्वमेव संमतः (३३९६)।

मुख्यं महत् इति सु.पाठः (३४५०) मुख्यमहत् इति ह.पाठः (७६)।

अनवस्थाऽन्यथा भवेत् इति सु.पाठः (३४५५) अनवस्थाऽथ वा भवेत् इति ह.पाठः (७६)।

यदैवाव्यतिरेकेऽस्य इति सु.पाठः (३५१९) यदैवाव्यतिरेकस्य इति ह.पाठः (७७) अयुक्तश्च।

अनवस्थाखनिर्भवेत् इति सु.पाठः (३५९४) अनवस्थाकरो भवेत् इति ह.पाठः (७७)।

दर्शनमानकौ इति मुद्रितपाठः न स्पष्टः (३६१५)। दर्शनमानगौ इति ह.पाठः (७६)।

उभयरूपिणः इति सु.पाठः (३६१८) उभयरूपकाः इति ह.पाठः (७८)।

इतोऽमुष्यामुतोऽमुष्य इति सु.पाठः (३६५५) इतोऽमुष्यामुतोऽप्यस्य इति ह.पाठः (७८)। परन्तु परिमळे इतोऽमुष्यामुतोऽप्यस्य इत्यपि पाठ उपलभ्यते (परिमळे.पृ.३९६०)।

पदार्था निखिला अपि इति मुद्रितपाठः न स्पष्टः (३६७२) पदार्था अखिला अपि इति ह.पाठः (७८)।

●इति वौपाधिकं भवेत् इति ह.पाठः (७८) सुधायाः संमत इति भाति (३७३२-३)।

कुत एव तु शून्यता इति सु.पाठः (३७६६) कुत एव च शून्यता इति ह.पाठः (७९)।

मायावादो ह्युपेक्षितः इति सु.पाठः (३७७२) मायावादोऽभ्युपेक्षितः इति ह.पाठः (७९)।

दुर्निवारं समापतेत् इति सु.पाठः (३७८०) दुर्निर्वार्य समापतेत् इति ह.पाठः (७९)।

श्रुतिदृष्टोऽप्यपोद्यते इति सु.पाठः (३७८७) श्रुतिदृष्टो व्यपोद्यते इति ह.पाठः (८०)।

ईश उक्तो यतस्ततः इति मुद्रितपाठः न स्पष्टः (३७८८) उक्त ईशो यतस्ततः इति ह.पाठः (८०)।

अनानन्दानुमानस्य इति मुद्रितपाठः न स्पष्टः (३७८८) अनानन्दानुमा तस्य इति ह.पाठः युक्तो भाति (८०)।

कालाख्यां शक्तिम् इति सु.पाठः (३७९८) कालाख्यशक्तिम् इति ह.पाठः (८०)।

आत्मानं च क्षणस्थितम् इति मुद्रितपाठः न स्पष्टः (३८१३) आत्मानं च क्षणस्थितिम् इति ह.पाठः (८१)। परन्तु सुधायां क्षणस्थितिम् इति पाठस्वीकारे किमपि नास्ति विनिगमकम्।

निर्मानिका भिदा इति मुद्रितपाठः न स्पष्टः (३८६६) निर्मानका भिदा इति ह.पाठः (८१)।

●पूर्वमध्यापरकलारहितः इति ह.पाठः (८२) संमत एव। व्याख्यानेषु तथैव दर्शनात् (३८७३)।

अभेदेऽपि विशेषेण इति सु.पाठः (३८७८) अभेदेन विशेषेण इति ह.पाठः (८२)।

•पारमार्थिकसत्त्वं तु इति ह.पाठः (८३) संमत एव (३८९८)।
सांवृतेनैव सत्त्वेन इति सु.पाठः (३८९८) सांवृतेनैव सत्येन इति ह.पाठः (८३)।
वस्तुत्वात् पुरुषोद्भवः इति मुद्रितपाठः न स्पष्टः (३९०७) वस्तुत्वात् पुरुषाद्भवः इति ह.पाठः (८३) युक्तो भाति।
इति वक्तुं न शक्यते इति सु.पाठः (३९४८) इति वक्तुं न युज्यते इति ह.पाठः (८४)।
अतिहाय प्रमाणाप्तनियमम् इति सु.पाठः (४००१) अतिहाय प्रमाणाप्तं नियमम् इति ह.पाठः (८५)।
• देहव्याप्तौ विशेषः कः इति प्र.पाठः (४०२६)। देहव्याप्त्यै विशेषः कः इति ह.पाठः (८५) संमत एव। श्रीनिवासतीर्थीये तथा व्याख्यानात्।
अदेहश्चेदसर्वज्ञः इति सु.पाठः (४०५२)। अदेहश्चेदसावज्ञः इति ह.पाठः (८६)।
एको नारायण आसीत् इति मुद्रितपाठः न स्पष्टः (४०५६)। एको नारायणस्त्वासीत् इति ह.पाठः (८७)।
स विष्णुः परमोऽक्षरः इति मुद्रितपाठः न स्पष्टः (४०५६)। स विष्णुः परमाक्षरः इति ह.पाठः (८७)।
मुखादासीत्सरस्वती इति मुद्रितपाठः न स्पष्टः (४०५६)। मुखादास सरस्वती इति ह.पाठः (८७)।
•वामैरन्यदुदीर्यते इति ह.पाठः (८८) पूर्वमेव संमतः, सुधायां तथैव मुद्रणात् (४०७३)।
ततस्त्वीश एक एव इति सु.पाठः (४०७६)। ह्यतस्त्वीश एक एव इति ह.पाठः (८८)।
ततो भूय इवायान्ति इति सु.पाठः (४०९८)। ततो भूय इवाप्स्यन्ति इति ह.पाठः (८९)।
दोषज्ञानादतीत्यैताम् इति सु.पाठः (४०९९)। दोषज्ञानादतीत्यैतान् इति ह.पाठः (८९)।
•एतत्सर्वं सतः साम्यम् इति ह.पाठः (८९) संमत एव, परिमळे तथा व्याख्यानात् (४१०९)।
वेदास्तदभिमानिनः इति सु.पाठः (४११०)। देवास्तदभिमानिनः इति ह.पाठः (९०) अयुक्तः। वेदस्य अग्रहणात्। वियत्पदेन खलु नित्यत्वेन वेदा अप्युपलक्षिताः। प्रधानस्य च वेदस्य, वेदस्यापीश्वरेच्छया। व्यक्तिर्नाम विशेषोऽस्ति इति वेदस्यैव उत्तरत्र ग्रहणात्।
जन्या इत्येव शब्दिताः इति मुद्रितपाठः न स्पष्टः (४१२५)। जन्या इत्येव कीर्तिताः इति ह.पाठः (९२)।
•उपसंपद्य तज्ज्योतिः इति ह.पाठः (१००) संमत एव। शे.वा.चन्द्रिकायां तथैव व्याख्यानात् (४१४८)।
बाधोऽवगम्यते इति मुद्रितपाठः न स्पष्टः (४१७३)। बाधोऽधिगम्यते इति ह.पाठः (१००)।
•वध्यो देवदत्तो हि वध्यते इति ह.पाठः (१००) पूर्वमेव संमतः। शे.वा.चन्द्रिकायां तथैव व्याख्यानात् (४१७३)।
बाधायोगात्सत इति इति सु.पाठः (४१७५)। बाधायोगः सत इति इति ह.पाठः (१००)।
न चेदेकं प्रमाणं तत् इति सु.पाठः (४१९९-४२०१)। न चेदेकममानं तत् इति ह.पाठः (१०१) अस्वरसः।
साक्षिप्रत्यक्षगोचराः इति सु.पाठः (४२२७)। साक्षिप्रत्ययगोचराः इति ह.पाठः (१०१)।
सारस्स्वरूपमस्यापि इति सु.पाठः (४२३०)। सारस्वरूपमस्यापि इति ह.पाठः (१०१)।
एकमेवाद्वितीयं तन्नेह इति मुद्रितपाठः न स्पष्टः (४२४३)। एकमेवाद्वितीयं नेह इति ह.पाठः (१०२)।
•विण्मूत्राक्ष्यादिमानिन्यः इति ह.पाठः (१०६) सुधायाः संमतः, व्याख्यानेषु तथैव दर्शनात् (४२५५-५६-५८)।
परमा श्रुतिः इति मुद्रितपाठः न स्पष्टः (४२५८)। परमश्रुतिः इति ह.पाठः (१०७)।
ततो रूपं महन्नाम इति मुद्रितपाठः न स्पष्टः (४२५९)। ततो रूपं महान्नाम इति ह.पाठः (१०७)।
व्यक्तसद्गुणः इति मुद्रितपाठः न स्पष्टः (४२६९)। व्यक्तसद्गुणाः इति ह.पाठः (१०८)।

संमतपाठाः १३

अविशेषविशेषौ च इति मुद्रितपाठः न स्पष्टः (४२७५)। अविशेषो विशेषौ च इति ह.पाठः (१२३)।
योग्यता बलवत्त्वं च इति मुद्रितपाठः न स्पष्टः (४२७५)। योग्यता प्रबलत्वं च इति ह.पाठः (१२३)।
दृश्यतेऽत्र स च भ्रमः इति सु.पाठः (४३०१)। दृश्यते च स च भ्रमः इति ह.पाठः (१२८)।
सिद्धतैव हि साधिका इति सु.पाठः (४३३८)। सिद्धतैव हि साधका इति ह.पाठः (१२८)।
न ह्याज्ञैवात्र साधिका इति सु.पाठः (४३६७)। न ह्याज्ञैवात्र साधका इति ह.पाठः (१२९)।
तत्र तैश्चावगम्यते इति सु.पाठः (४३७७)। तत्र तैश्चैव गम्यते इति ह.पाठः (१२९)।
यद्यसिद्धस्य चेष्यते इति सु.पाठः (४३८९)। यदासिद्धस्य चेष्यते इति ह.पाठः (१२९)।
अप्रयोजनता तत्र इति सु.पाठः (४४०७)। अप्रयोजकता तत्र इति ह.पाठः (१२९)।
तन्मात्रस्यान्यथाभावे इति सु.पाठः (४४८६)। तन्मात्रस्यान्यथाभावात् इति ह.पाठः (१३०)।
ऐक्यप्रमाणमिथ्यात्वम् इति सु.पाठः (४४९४)। ऐक्यप्रामाण्यमिथ्यात्वम् इति ह.पाठः (१३०)।
आत्मनो न प्रतीयते इति सु.पाठः (४५१८)। आत्मनो न प्रमीयते इति ह.पाठः (१३१)।
अतः सर्वे पदार्थाश्च इति सु.पाठः (४५४७)। अतः सर्वपदार्थाश्च इति ह.पाठः (१३१)।
कथं तद्भ्रान्तता भवेत् इति सु.पाठः (४५६६)। कथं तद्भ्रान्तिता भवेत् इति ह.पाठः (१३२)।
भ्रान्तत्वभ्रान्तता चेत्स्यात् इति सु.पाठः (४५६७)। भ्रान्तित्वभ्रान्तता चेत्स्यात् इति ह.पाठः (१३२)।
निमित्तमैश्वरी मुख्या इति सु.पाठः (४५६९)। निमित्तमैश्वरी मुख्यम् इति ह.पाठः (१३२)।
●उभाभ्यां त्रातमैश्वर्या इति ह.पाठः (१३२) संमतः एव, तथा व्याख्यानात् ४५७०।
सुषुप्तिबोधमोहांश्च इति सु.पाठः (४५८३)। सुषुप्तिमोहबोधांश्च इति ह.पाठः (१३३)।
जीवं नयति जीवेशः इति मुद्रितपाठः न स्पष्टः (४५८३)। जीवं नयति देवेशः इति ह.पाठः (१३३)।
मानं नैव क्वचिद्भवेत् इति मुद्रितपाठः न स्पष्टः (४५९४)। मानं नैव भवेत् क्वचित् इति ह.पाठः (१३४)।
●किं मा निन्दन्ति शत्रवः इति ह.पाठः (१३५) संमत एव (४५९९)।
छाया यथा पुंसदृशी इति मुद्रितपाठः न स्पष्टः (४६०६)। छाया यथा पुंसदृशा इति ह.पाठः (१३५)।
पुमधीना यथेयते इति मुद्रितपाठः न स्पष्टः (४६०६)। पुमधीनो यथेयते इति ह.पाठः (१३५)।
आभासा एव पुरुषाः इति सु.पाठः (४६०६)। आभास एवं पुरुषाः इति ह.पाठः (१३६)।
अनुसन्धानरहितं समुदायैक्यम् इति मुद्रितपाठः न स्पष्ट : (४६३८)। अनुसन्धानरहितसमुदायैक्यम् इति ह.पाठः (१३६)।
अशेषगुणोन्नद्धं निर्दोषम् इति सु.पाठः (४६४२)। अशेषगुणोन्नद्धनिर्दोषम्इति ह.पाठः (१३७)।
यदीशत्वविरोधि स्यात् इति सु.पाठः (४६५८)। यदीशित्वविरोधि स्यात् इति ह.पाठः (१३७)।
सिद्धेशत्वेन चायुक्तम् इति सु.पाठः (४६५८)। सिद्धेशित्वेन चायुक्तम् इति ह.पाठः (१३७)।
ईशत्वस्याविरोधेन इति सु.पाठः (४६५८)। ईशित्वस्याविरोधेन इति ह.पाठः (१३७)। परन्तु ह.पाठेऽपि पूर्वम् ईशत्वस्याविरोधि यत् इति ईशत्वपदप्रयोगेन (१३७) अननुगतमिदं पाठभेदत्रयम्।
●भोक्तृभोग्यतया स्थिताः इति ह.पाठः (१४१) संमत एव। स्थितः इति तु मुद्रणदोषः[६३] (४६७३)।
तथापि स्याद्विशेषता इति सु.पाठः (४६७५)। तथापि स्याद्विशेषतः इति ह.पाठः (१४१)।
स्वरूपत्वं हि भेदिनः इति सु.पाठः (४६८६)। स्वरूपत्वं हि भेदिना इति ह.पाठः (१४१)।
भेद एव गवाश्वयोः इति सु.पाठः (४६९०)। भेद एव गवश्वयोः इति ह.पाठः (१४१)[६४]।

---

[६३] एतादृशमुद्रणदोषानपि पाठभेदत्वेनोल्लिखितवन्तः गोविन्दाचार्याः, किं स्वीयसंस्करणे मुद्रणदोषाः न सन्ति इति मन्यन्ते?।
[६४] द्र० अत्रैव परिशिष्टे एतद्विषये चर्चा।

°राहित्यविशेषणविशेषिता इति सु.पाठः (४६९३)। °राहित्यविशेषेण विशेषिता इति ह्.पाठः (१४२)।

यदि पश्चाद्विचेष्टते इति मुद्रितपाठः न स्पष्टः (४७२५)। पश्चाद् यदि विचेष्टते इति ह्.पाठः (१४३)।

●सर्वकर्तार एव च इति ह्.पाठः (१४३) संमत एव, जगत्सृष्ट्यादिकर्तारश्च इति व्याख्यानात् (४७२९) सर्वकर्तार एव तु इति प्र.पाठः।

●सुस्वादुतम एकलः। गुणोरुसमुदायोऽयम् इति ह्.पाठः (१४४) संमतः, तथैव मुद्रणात् (४७३२)।

वासुदेवश्रुतिश्चैषा इति मुद्रितपाठः न स्पष्टः (४७३२)। वासुदेवश्रुतिस्सैषा इति ह्.पाठः (१४४)।

तथान्यान्यपि सर्वशः मुद्रितपाठः न स्पष्टः (४७३७)। तथान्यान्यपि सर्वदा इति ह्.पाठः (१४४)।

°माहात्म्यगुणपूगो जनार्दनः इति ह्.पाठः (१४४) संमतः, शे.वा.चन्द्रिकायां तथैव व्याख्यानात् (४७३९)।

●आपरोक्ष्यं भवेद्विष्णोः इति ह्.पाठः (१४५) संमतः, शे.वा.चन्द्रिकायां तथैव व्याख्यानात् (४७४३)।

अनुमागम्यतो मोक्षः इति सु.पाठः (४७६२)। अनुमानगम्यतो मोक्षः इति ह्.पाठः (१४५)।

●यदि स्यादनुमैव हि इति मुद्रितपाठे न स्पष्टम्। यदि तस्यानुमैव हि इति ह्.पाठः (१४५) युक्तो भाति।

तेनाननुसृतः इति ह्.पाठः (१४५) संमत एव, तथैव व्याख्यानात् (४७६३)।

अशक्योत्तारणत्वेऽपि इति सु.पाठः (४७६९)। अशक्योत्तरणत्वेऽपि इति ह्.पाठः (१४५) अननुगतः, पूर्वमत्रैव उत्तारणोपमा इति ह्.पाठात्, न्यायविवरणेऽपि उत्तारणात्यशक्त्यैव इति।

इत्याशङ्कापनोदार्थम् इति सु.पाठः (४७६९)। इति शङ्कापनोदार्थम् इति ह्.पाठः (१४५)।

●इतोऽत्यभ्यधिकत्वेऽपि इति ह्.पाठः (१४६) संमतः एव (४७८२)।

●विशेषगुणवकृतः इति ह्.पाठः (१४६) पूर्वमेव संमतः (४७८५)।

स्वातन्त्र्यान्नैव दूषणम् इति सु.पाठः (४७९२)। स्वातन्त्र्यान्न च दूषणम् इति ह्.पाठः (१४६)।

विशेषदर्शितालापौ इति मुद्रितपाठः न स्पष्टः (४८००)। विशेषदर्शिताऽऽलापः इति ह्.पाठः (१४७)।

तदन्येषां यथायोगम् इति सु.पाठः (४८०५)। तदन्येषां यथायोग्यम् इति ह्.पाठः (१५२)।

वेत्ति तस्योक्तमार्गेण इति सु.पाठः (४८३०)। वेत्ति तस्योक्तिमार्गेण इति ह्.पाठः (१५३)।

पुनरेव समाचरेत् इति सु.पाठः (४८३४)। पुनरेव समारभेत् इति ह्.पाठः (१५३)।

दुश्शास्त्रं च परित्यजेत् इति मुद्रितपाठः न स्पष्टः (४८५२)। दुश्शास्त्रं तु परित्यजेत् इति ह्.पाठः (१५४)।

●किमुताधिक्यदृष्टेस्तद्° इति ह्.पाठः (१६३) संमतः (४८८९)।

संप्रोक्तगुणसंयुतः इति सु.पाठः (४८८९)। संप्रोक्तगुणसंयुतम् इति ह्.पाठः (१६३)।

प्रकृतिं मोहिनीं श्रिताः इति मुद्रितपाठः (४८९२)। प्रकृतिं मोहनीं श्रिताः इति ह्.पाठः (१६३)। परन्तु गो.मुद्रितगीतायाम् मोहिनीम् इत्येव दृश्यते (भ.गी.९-१२)।

●परावरविदोऽपि च इति ह्.पाठः (१६४) संमतः, सुधायां तथैव व्याख्यानात् (४९०४)।

विशेषश्चाव्यभिचारेण इति सु.पाठः (४९१५)। विशेषश्च व्यभिचारेण इति ह्.पाठः (१६४)।

अभावाभावतैव स्यात् इति सु.पाठः (४९४५)। अभावाभावता यत् स्यात् इति ह्.पाठः (१६५)।

तथोत्तरं न चैव स्यात् इति मुद्रितपाठः न स्पष्टः (४९५६)। तथोत्तरं च नैव स्यात् इति ह्.पाठः (१६५)।

यदेशस्य प्रसादतः इति सु.पाठः (४९७४)। यदीशस्य प्रसादतः इति ह्.पाठः (१६५)।

पुरुषेणैवेदं व्याप्तम् इति सु.पाठः (५००२)। पुरुषेणेदं व्याप्तम् इति ह्.पाठः (१६६)। अनुमानगम्यतो मोक्षः इत्यादि ह्.पाठेऽपि छन्दोव्यत्ययो लक्ष्यत एव (१४५)।

ये त्वविद्यामुपासते इति मुद्रितपाठः न स्पष्टः (५०१६)। येऽविद्यामुपासते इति ह्.पाठः (१६६)।

सर्वैस्तर्कैस्सदागमैः इति सु.पाठः (५०२४)। सर्वैस्तर्कसदागमैः इति ह्.पाठः (१६६)।

●ब्रह्मा सर्वैर्गुणैश्चैव इति ह्.पाठः (१६६) संमतः (५०२५)।

निरृत्रर्तिर्मित्रसदृशः इति मुद्रितपाठः न स्पष्टः (५०३४)। निऋतिर्मित्रसदृशः इति ह्.पाठः (१६६)।

शुभमिच्छता इति सु.पाठः (५०४६)। मुक्तिमिच्छता इति ह्.पाठः (१६७)।

सर्वेषां गुरवः स्मृताः इति मुद्रितपाठः न स्पष्टः (५०४९)। सर्वेषां गुरवः श्रुताः इति ह.पाठः (१६८)।
●स्वाधिका त्वेव इति ह.पाठः (१६८) संमतः। व्याख्यानेषु सुधायां च तथैव दर्शनात् (५०५२)।
तत्पूर्विकोपासनैवम् इति मुद्रितपाठः न स्पष्टः (५०५३)। तत्पूर्वकोपासनैवम् इति ह.पाठः (१६८)।
अशुचित्वादिकं चास्य इति सु.पाठः (५०७३)। अशुचित्वादिकं तस्य इति ह.पाठः (१७३)।
यथाक्रमम् इति ह.पाठः (१७३)। सुधायां न स्पष्टम्। यथा क्रमः इति प्र.पाठे। सुधापुस्तके तु यथाक्रमम् इति दृश्यते (५०७६)।
रतिमवाप्नुयात् इति मुद्रितपाठः न स्पष्टः (५०९३)। रतिमवाप्नुवन् इति ह.पाठः (१७४) साधुः।[६५]
अर्वाक्छिरसा कृतम् इति मुद्रितपाठः न स्पष्टः (५१२१)। अवाक्छिरसा कृतम् इति ह.पाठः (१७५)।
ब्रह्मविदोऽपि च इति मुद्रितपाठः न स्पष्टः (५१२१)। ब्रह्मविदोऽपि हि इति ह.पाठः (१७५)।
साधनवैचित्र्यम् इति सु.पाठः (५१३४)। साधनवैशेष्यम् इति ह.पाठः (१७६)।
विमोहक्लेशसाध्वसैः इति सु.पाठः (५१३५)। विमुक्तक्लेशसाध्वसैः इति ह.पाठः (१७६)।
°तपस्सत्त्वदयान्वितैः इति मुद्रितपाठः न स्पष्टः (५१३५)। °तपस्सत्यदयान्वितैः इति ह.पाठः (१७६) युक्तः।
ब्रह्मापि यं वेत्ति न चेह (५१३७), ब्रह्मादीनाम् (५१३७), सत्त्वसंङ्घाः (५१३८) इति मुद्रितपाठाः न स्पष्टाः। ब्रह्मापि यं वेत्ति नैवेह (१७६), धर्मादीनाम् (१७६), सत्त्वसंङ्गाः इति ह.पाठाः (१७७)।
अनसूयश्च, पुण्यकर्मणा इति मुद्रितपाठौ न स्पष्टौ (५१३८)। अनसूयुश्च, पुण्यकर्मणाम् इति च ह.पाठौ (१७७)।
पश्यत्यञ्जस्तथा वाणी इति सु.पाठः (५१३९)। पश्यन्त्यञ्जस्तथा वाणी इति ह.पाठः (१७८)।
यथायोगम् इति सु.पाठः (५१३९)। यथायोग्यम् इति ह.पाठः (१७८)।
अनन्तांशान् इति सु.पाठः (५१४८)। अनन्तांशात् इति ह.पाठः (१७८)।
च मुक्तानाम् इति सु.पाठः (५१५१)। विमुक्तानाम् इति ह.पाठः (१७९)।
नैव तत्रास्ति इति मुद्रितपाठः न स्पष्टः (५१६५)। तत्र नैवास्ति इति ह.पाठः (१७९)।
श्रुत्युक्तनिर्दोषतैवम् इति मुद्रितपाठः न स्पष्टः (५१६५)। श्रुत्युक्तनिर्दोषतैव इति ह.पाठः (१७९)।
चेतनत्वाद्यथा पुरा इति मुद्रितपाठः न स्पष्टः (५१६७)। चेतनत्वात् पुरा यथा इति ह.पाठः (१८०)।
तारतम्यानुमा तस्मात् इति सु.पाठः (५१७७)। तारतम्यानुमा तेन इति ह.पाठः (१८०)।
श्रुतियुक्तिबलादेव इति मुद्रितपाठः न स्पष्टः (५१७८)। श्रुतियुक्तिबलादेवम् इति ह.पाठः (१८०)।
बलज्ञानाधिकत्वं तु इति मुद्रितपाठः न स्पष्टः (५१८४)। बलज्ञानाधिकत्वं च इति ह.पाठः (१८०)।
मात्रामुपादाय इति मुद्रितपाठः न स्पष्टः (५१८६)। मात्रामपादाय इति ह.पाठः (१८१)। परन्तु उपनिषदि गो.मुद्रितायां मात्रामुपादाय इत्येव पठ्यते (बृ.भा.पृ.३४०)।
●अन्येषां वा भूतानाम् इति ह.पाठः (१८१) आचार्यसंमतः, बृ.भाष्ये तथैव दर्शनात् (बृ.भा.पृ.३४०)। अत्र शे.वा.चन्द्रिकायां तथैव पठ्यते (५१८६)। अन्येषां भूतानाम् इति प्र.पाठः।
अक्षय्या क्लेशवर्जिता इति मुद्रितपाठः न स्पष्टः (५१९०)। अक्षया क्लेशवर्जिता इति ह.पाठः (१८१)।
प्रकृतिं मोहिनीं श्रिताः इति मुद्रितपाठः न स्पष्टः (५१९०)। प्रकृतिं मोहनीं श्रिताः इति ह.पाठः (१८१)। परन्तु गो.मुद्रितगीतायाम् मोहिनीम् इत्येव दृश्यते (भ.गी.९-१२)।
●भूतेष्वलोलुत्वम् इति ह.पाठः (१८१) संमतः, प्रमेयदीपिकायां तथा व्याख्यानात् (प्र.दी.१६-२) (५१९०)।

[६५] तेनाध्यायक ईरितः इति सु.ह.पाठयोस्साम्येऽपि सुधायाम् आध्यायक इति, अन्यत्र अध्यायक इति च छेदः (सु. ५१०८) (ह.१७४)।

●दम्भो दर्पोऽभिमानश्च इति मुद्रितपाठे, दम्भः इति संमतम्, अभिमानश्च इति न स्पष्टम् (५१९०)। डम्भो दर्पोऽतिमानश्च इति ह.पाठः (१८१)। परन्तु गो.मुद्रिते गीताभाष्यपुस्तके[६६] अभिमानश्च इति पठ्यते (गी.भा.पृ.१४२)। अवजानन्तीत्यादि भगवद्वचनम् इति पद्मनाभतीर्थाः।

बाहुशालित्वम् इति सु.पाठः (५१९१)। बाहुषाळित्वम् इति ह.पाठः (१८२)।

विपरीतास्स्मृता दैत्याः इति मुद्रितपाठः न स्पष्टः (५१९१)। विपरीतास्ततो दैत्याः इति ह.पाठः (१८२)।

°वाक्यसंदर्भैः इति सु.पाठः (५१९१)। °वाक्यसंदर्भे इति ह.पाठः (१८२)।

●अनादिर्विशेषो न इति ह.पाठः (१८२) संमतः (५१९३)।

मिश्रमतयो विमिश्रगतयोऽपि च इति सु.पाठः (५१९१)। मिश्रगतयो विमिश्रमतयोऽपि च इति ह.पाठः (१८२)।

अदृष्टाच्चेद्विशेषोऽयम् इति सु.पाठः (५१९८)। अदृष्टाच्च विशेषोऽयम् इति ह.पाठः (१८२)।

संमुग्धं दर्शनम् इति सु.पाठः (५२१२)। संमुग्धदर्शनम् इति ह.पाठः (१८३)।

बर्कश्रुतेश्चैव इति मुद्रितपाठः न स्पष्टः (५२१४)। बर्कुश्रुतेश्चैव इति ह.पाठः (१८३)।

दोषो दृश्यो हरेः इति मुद्रितपाठः न स्पष्टः (५२१६)। दृश्यो दोषो हरेः इति ह.पाठः (१८३)।

दुःखं भयाभयकृपादयः इति मुद्रितपाठः न स्पष्टः (५२२३)। दुःखभयाभयकृपादयः इति ह.पाठः (१८४)।

तत्प्रामाण्यं स्वलक्षणम् इति मुद्रितपाठः न स्पष्टः (५२३६)। तत्प्रामाण्यस्वलक्षणम् इति ह.पाठः (१८४)। सुधायाम् अपि प्रामाण्यस्वरूपमिति व्याख्यानात् तत्प्रामाण्यस्वलक्षणम् इति सुधापाठो भवेत् इति गोविन्दाचार्योक्तं समीचीनमेव। प्रामाण्यं स्वलक्षणम् इत्येव पाठे सुधायां स्वलक्षणं प्रामाण्यम् इत्येव व्याख्यानमभविष्यत्। अथ वा तत्प्रामाण्यं स्वलक्षणम् इति सत्त्वादेव तस्य उत्तरत्र अप्रामाण्यविविक्तं प्रामाण्यम् इति व्याख्या दृश्यते। तस्मात् यथामुद्रितमपि साध्वेव। किंच सन्न्यायरत्नावल्याम् अतो यत्साक्षिणा प्रमाणत्वेनावधृतं तत्प्रमाणम् इति प्रमाणलक्षणम् इति व्याख्यानात् तत्प्रमाणस्वलक्षणम् इति वा, तत्प्रमाणस्य लक्षणम् इति वा पाठेन भाव्यमिति संशीयते।

सर्वलक्षणयुक्तं च इति सु.पाठः (५२५७)। सर्वलक्षणयुक्तं तु इति ह.पाठः (१८५)।

●चैत्रमात्राद्विनैव तु इति मुद्रितपाठः न स्पष्टः (५२६१)। चैत्रमात्राद्विनैव हि इति ह.पाठः (१८५)। सुधायामपि यस्मात् इति व्याख्यानात् संमतमिति चिन्त्यते।

स्वपदस्य यत् इति सु.पाठः (५२७१)। स्वरवस्य यत् इति ह.पाठः (१८५)।

इत्यत्र न च प्रमा इति मुद्रितपाठः न स्पष्टः (५२७४)। इत्यत्र च न प्रमा इति ह.पाठः (१८५)।

भोक्तृभोज्यतः इति ह.पाठः (१८५) संमतः (५२७५)।

●ज्ञानमेवं न तद्भवेत् इति ह.पाठः (१८६) संमत इव भाति उपसंहरति इति सुधायां व्याख्यानात् (५२७९), एवं नित्यमपि ज्ञानम् इति व्याख्यानात् सन्न्यायरत्नावल्या अपि संमतमेतत्।

नास्य कर्म हि इति मुद्रितपाठः न स्पष्टः (५२९८)। नास्य कर्म ह इति ह.पाठः (१८६)। श्रुत्यनुसारेण भाष्येण भाव्यत्वात् उत्तरत्रापि अविद्वान् बहु कृत्वापि ह्यन्तवत्फलमाप्नुयात् इत्यत्र हान्तवत् इति पाठेन भाव्यमिति संशीयते।

ज्ञानात्पूर्वाणि कर्माणि इति सु.पाठः (५३०४)। ज्ञानात्पूर्वाणि सर्वाणि इति ह.पाठः (१८७)।

द्वेषतोऽपि विमुक्तिः इति सु.पाठः (५३१४) सन्दर्भानुगुणः। द्विषतोऽपि विमुक्तिः इति ह.पाठः (१८७)।

महातात्पर्यरोधेन इति सु.पाठः (५३२४)। महातात्पर्यरोधे च इति ह.पाठः (१८७)।

---

[६६] गोविन्दाचार्यैः गीताभाष्यद्वयं मुद्रापितम्। तत्र प्रथमतः प्र.पाठानुसारि एकम्। द्वितीयं च ह.पाठानुसारि। तत्र प्र.पाठानुसारिपुस्तके फार्म् संख्यानिर्देशावसरे टी. इति चिह्नं भवति। ह.पाठानुसारिपुस्तके तु तत्र स्थले ह. इति भवति। परन्तु तैः प्र.पाठानुसारिपुस्तकं किमर्थं मुद्रापितम् इति न ज्ञायते।

गिरिजेन्द्रा गिरांपतिः इति मुद्रितपाठः न स्पष्टः (५३३७)। गिरिजेन्द्राङ्गिरस्सुताः इति ह.पाठः (१८८)।
तत्पूजा विहितात्यागः इति मुद्रितपाठः न स्पष्टः (५३३८)। तत्पूजाऽविहितत्यागः इति ह.पाठः (१८८)।
साधनस्य विनिर्णयः इति सु.पाठः (५३३८)। साधनस्यार्तिनिश्चयः इति ह.पाठः (१८८) अननुगतः, पूर्वं साधनस्य विनिर्णये इति अनुभाष्यात्। साधनस्यार्तिनिर्णयः इति प्र.पाठः।[६७]
°त्यधिकमन्यतः इति सु.पाठः (५३४५)। °त्यखिलमन्यतः इति ह.पाठः[६८] (१८९)।
तेषु हि ब्रह्मणोऽधिकम् इति मुद्रितपाठः न स्पष्टः, प्रायः तथैव भवेत् (५३४५)।
द्रव्यस्वातन्त्र्यादीनामत्यन्ताधिक्याद्देवैरनुष्ठितयोः धर्मज्ञानयोः फलमत्यन्ताधिक्येन भवेत् इति च सन्न्यायरत्नावळी। तेषु हि ब्रह्मणो हि तत् इति ह.पाठः (१९०)।
स्वयं भगवतो वचः इति मुद्रितपाठः न स्पष्टः ()। स्वयं भगवता वचः इति ह.पाठः (१९१)।
●अन्यः प्रियतरो भुवि इति ह.पाठः (१९२) संमतः, परिमळे मुद्रितगीतायां च तथैव पाठात् (५३५४)। प्रियतमः इत्यस्य मुद्रणदोषत्वात्।
●मुक्तिश्चेहैव लभ्यते इति ह.पाठः (१९२) संमतः, तथैव सुधायां व्याख्यानात् (५३५९)।

संमतपाठाः २२

चतुर्थाध्याये

तत्प्रसादैधिताः सदा इति मुद्रितपाठः न स्पष्टः (५३६६), परन्तु सुधायां तद्व्याख्यानेषु वा तद्विषये चर्चा नास्तीति ऐकारघटित एव पाठस्तेषामभिमत इति मन्ये। अन्यथा तद्विषये चर्चा अवश्यमभविष्यत्, अवेहि दूतमागतम् इति[६९] यथा। तत्प्रसादैधिताः सदा इति ह.पाठः (१९३)।
इति पैङ्गिश्रुतिश्चैव इति सु.पाठः (५३७१)। इति पिङ्गश्रुतिश्चैव इति ह.पाठः (१९४)।
चोरेणेशापहारिणा इति मुद्रितपाठः न स्पष्टः (५३७९)। चोरेणात्मापहारिणा इति ह.पाठः (१९४)।
अन्धे तमसि मज्जति इति मुद्रितपाठः न स्पष्टः (५३७९)। महातमसि मज्जति इति ह.पाठः (१९५)।
अन्यथाध्यातमञ्जसा इति मुद्रितपाठः न स्पष्टः (५३८०)। अन्यथाज्ञातमञ्जसा इति ह.पाठः (१९५)।
भेदो यस्सत्यतां गतः इति सु.पाठः (५४०४)। भेदोऽयं सत्यतां गतः इति ह.पाठः (१९५)।
●वेदविदो मतम् इति ह.पाठः (१९६) सुधायाः संमत एव, सूत्रकारस्याभिमतम् इति व्याख्यानात् (५४१७)। न तु वेदविदाम् इति।
●नीचताध्यानात् अनर्थः इति ह.पाठः (१९६) सुधायाः संमत एव (५४१८), तदेव ब्रह्मणो नीचताध्यानमिति तस्मादनर्थः किं न जायते इति व्याख्यानात्। न तु नीचताज्ञानात् इति।
●स्वात्मताध्यानात् इति ह.पाठः (१९६) सुधायाः संमत एव (५४१९), स्वात्मताध्यानाद्ब्रह्म कुप्यति इति व्याख्यानात्। न तु स्वात्मताज्ञानात् इति।
लोकेऽभिपश्यति इति सु.पाठः (५४२१)। लोके हि पश्यति इति ह.पाठः (१९६)।
चण्डाले नृप इत्यपि इत्येव सु.पाठः (५४२१)। चण्डालो नृप इत्यपि इति प्र.पाठः। चण्डालं नृप इत्यपि इति ह.पाठः (१९६)।
●फलं मोक्ष इति प्रोक्तः क्रमात्पादेषु चिन्तितः इति ह.पाठः (२००) पूर्वमेव संमतः (५४३९)।
सृष्टस्वेव च सृज्यानाम् इति सु.पाठः (५४४३)। सृष्टस्वेव तु सृज्यानाम् इति ह.पाठः (२००)।
विशतामुत्तरं स्वतः इति सु.पाठः (५४४४)। विशतामुत्तमं स्वतः इति ह.पाठः (२००)।

---

[६७] युक्तयः पराः इति सु.पाठः (५३४४), युक्तयोऽपराः इति तत्त्वदीपिका (गो.टि.१८८)
[६८] अत्र प्राचीनपाठे इति गो.टिप्पणी। प्रायो ह.पाठ एव स्यादिति एवं पाठभेदनिर्देशः कृतः।
[६९] महाभारततात्पर्यनिर्णये सुन्दरकाण्डे।

देवानां तु कदाचन इति मुद्रितपाठः न स्पष्टः (५४४४)। देवानां च कदाचन इति ह.पाठः (२००)।

तत्तन्त्रत्वात्तु केवलम् इति मुद्रितपाठः न स्पष्टः (५४६५)। तत्तन्त्रत्वाच्च केवलम् इति ह.पाठः (२००१)।

●प्राय एवं श्रियोऽपि च इति ह.पाठः (२०१) सुधायाः संमत एव (५४६६) तथैव व्याख्यानात्।

मोक्षरूपं प्रदर्श्यते इति सु.पाठः (५४७०)। मोक्षरूपं प्रदृश्यते इति ह.पाठः (२०१)।

संसृत्यवस्था विज्ञेया संवत्यैव विशिष्यते इति सु.पाठः (५४९२)। संसृत्यवस्थं विज्ञेयं संवत्यैव विशेष्यते इति ह.पाठः (२०१)।

संवृत्या यस्त्ववच्छिन्नः इति सु.पाठः (५४९४)। संवृत्याऽन्यस्त्ववच्छिन्नः इति ह.पाठः (२०१)।

शून्यं ब्रह्मेति नो भिदा इति सु.पाठः (५४९६)। शून्यं ब्रह्मैव नो भिदा इति ह.पाठः (२०२)।

धर्माः केऽपि न सन्त्येव इति सु.पाठः न स्पष्टः (५५०५)। धर्माः तेऽपि न सन्त्येव इति ह.पाठः (२०२)।

न च मायी वदेदत्र इति सु.पाठः (५५२४)। न च मायी वदेत् तत्र इति ह.पाठः (२०२)।

सांख्यनैयायिकाद्याश्च इति सु.पाठः (५५४५)। सांख्यनैयायिकाद्यास्तु इति ह.पाठः (२०३)।

●इत्यनिष्टं हि सर्वथा इति ह.पाठः (२०३) संमत एव, परिमळे तथा व्याख्यानात् (५५७६)।

न वर्णोकारसंमितः इति सु.पाठः (५५९७)। न वर्णोऽकारसंमितः इति ह.पाठः (२०४)।

अङ्गादिकमावयन्ति इति सु.पाठः (५६०५) अत्र आवयन्ति इति पाठः कण्ठरवेणोपात्तः सुधायाम्[७०]।

अङ्गादिकम् इति पदे न स्पष्टम्। अङ्गादियुगापयन्ति इति ह.पाठः (२०४)।

भुङ्क्ते स देवः इति मुद्रितपाठः न स्पष्टः (५६०६)। भुङ्क्ते स दैवम् इति ह.पाठः (२०४)। परन्तु सुधायां दैवम् इति पदमुपात्तमित्यत्र किमपि लिङ्गं नास्ति।

न चैव मुक्तेन हरेः इति मुद्रितपाठः न स्पष्टः (५६१४)। न चैव मुक्तौ तु हरेः इति ह.पाठः (२०४)।

सुखं मम स्याद्धि इति सु.पाठः (५६१७)। सुखं मम स्याच्च इति ह.पाठः (२०४)।

°संप्राप्तिविरोधहेतवः इति सु.पाठः[७१] (५६१९)। °संप्राप्तिविरुद्धहेतवः इति ह.पाठः (२०५)।

शश्वदतिप्रसिद्धिर्विवेक° इति सु.पाठः (५६१९)। शश्वदतिप्रसिद्धिविवेक° इति ह.पाठः (२०६)।

[७२]उमागिरीशाविति इति सु.पाठः (५६२६)। उमागिरीशावपि इति ह.पाठः (२१२), अनुव्याख्यानमुद्रितपाठोऽपि (५६२६)।

सहैतेन इति इति मुद्रितपाठः न स्पष्टः (५६२८)। सहैनेन इति ह.पाठः (२१२)।

सायुज्यहीनास्तु इति मुद्रितपाठः न स्पष्टः (५६३१)। सायुज्यहीनाश्च इति ह.पाठः (२१४)।

प्रोक्तं च इति सु.पाठः (५६३२)। प्रोक्तं तु इति ह.पाठः (२१४)।

गिरां प्रभुः इति सु.पाठः (५६३२)। गिरां पतिः इति ह.पाठः (२१४)।

पैङ्गिश्रुतौ इति मुद्रितपाठः न स्पष्टः (५६३६)। पिङ्गश्रुतौ इति ह.पाठः (२१४)।

पारिषदाः इति मुद्रितपाठः न स्पष्टः (५६३९)। पार्षदाः इति ह.पाठः (२१५)।

सान्तानिकप्राप्तिः इति मुद्रितपाठः न स्पष्टः (५६४३)। परन्तु परिमळे सान्तानिकप्राप्तिः इति वर्तते। सान्तानिकं प्राप्तिः इति ह.पाठः (२१५)[७३]।

कृतनिश्चयश्च इति मुद्रितपाठः न स्पष्टः (५६५०)। परन्तु परिमळे कृतनिश्चयः इति वर्तते। कृतनिःश्रमश्च इति ह.पाठः[७४] (२२०)।

---

[७०] द्र० अस्य विषये चर्चा।

[७१] द्र० अस्य विषये चर्चा।

[७२] समस्तजीवाः इति स्थाने समस्तजीवैः इति क्वचित्पठ्यते। तत्त्वप्रदीपिकासंमतोऽपि सः एव पाठः इत्याभाति इति गो.टिप्पणी (२११)। परन्तु सुधायां समस्तजीवाः इत्येव पठ्यते (५६२४)।

[७३] मुद्रणदोषः? पाठभेदानुल्लेखात्।

●नान्यस्य हि युक्तिमेति इति ह.पाठः (२२४) संमतः, शे.वा.चन्द्रिकायां तथैव व्याख्यानात् (५६५५)।

चतुर्थाध्याये आहत्य ४३ पाठेषु संमतपाठाः ७।

आहत्य २८० प्र.पाठेषु संमतपाठाः ५०, विमताः ८५

प्रथमाध्याये	८
द्वितीयाध्याये	१३
तृतीयाध्याये	२२
चतुर्थाध्याये	७
आहत्य संमतपाठाः	५०
आहत्य विमतपाठाः	८५

उपयुक्तग्रन्थसूची

अनुव्याख्यानम्

१. द्र० सर्वमूलग्रन्थाः १.

२. संपादकः टि.आर्.कृष्णाचार्यः कुम्भकोणम् १९००.

काशिका श्लोकवार्तिकव्याख्या, अपोहवादभागव्याख्या अमुद्रिता, अडयार्मातृकागारस्था, मत्समीपे विद्यमाना प्रतिकृतिः.

गीतातात्पर्यम्

१.सर्वमूलग्रन्थाः १.

२. संस्कृतनेट्तः स्वीकृतम्, प्रायः बेङ्गळूरुपूर्णप्रज्ञविद्यापीठप्रकाशितपुस्तकानुसारि.

गीताभाष्यम्

१.(प्रमेयदीपिकासहितम्) संपादकः बाळगारु रुचिराचार्यः, आचार्यविद्याधिष्ठानम्, बेङ्गळूरु.२००२.

२.द्र० सर्वमूलग्रन्थाः १.

तत्त्वप्रदीपः

१.ब्रह्मसूत्रभाष्यम् तत्त्वप्रदीपिकया सहितम्, अखिलभारतमाध्वमहामण्डलम्, उडुपी, १९५८.

२. ब्रह्मसूत्रभाष्यम् ४.

नयचन्द्रिका नारायणपण्डिताचार्यकृता अनुव्याख्यानटीका, संपादकः सवणूरु गोविन्दराव, धारवाड ([७५]पूना?), १९३७.

न्यायदीपिका द्र० गीतातात्पर्यम् २.

न्यायरत्नाकरः द्र० श्लोकवार्तिकम्.

न्यायविवरणम् रघूत्तमतीर्थकृतभावबोधसमेतम्, उडुपी, १९१७.

न्यायसुधा (षट्टिप्पण्युपेता) श्रीमदुत्तरादिमठः बेङ्गळूरु, १९८२.

---

[७४]मुद्रणदोषः ? पाठभेदानुल्लेखात्।

[७५] भारतीयदार्शनिकविश्वकोषे कार्ल् पाटर् विरचिते एवं निर्दिष्टम्।

प्रमाणलक्षणम् (टीकया अनेकटिप्पणीभिश्च युतः) मध्वराद्धान्तसंवर्धकसभा, चेन्नै १९६९.
प्रमेयदीपिका द्र० गीताभाष्यम्
बृहदारण्यकभाष्यम् द्र० सर्वमूलग्रन्थाः १.
ब्रह्मसूत्रभाष्यम्
१. द्र० सर्वमूलग्रन्थाः १. (गोविन्दाचार्यसंपादितम्)
२. द्र० सर्वमूलग्रन्थाः २. (प्रभञ्जनाचार्यसंपादितम्)
३. (टीका-भावदीपसंवलितम्) संपादकः आर्.एस्.पञ्चमुखी, विद्यासागर आर्.एस्.पञ्चमुखी इण्डालाजिकल् रिसर्च् सेण्टर्, नवदेहली, १९९४.
४. (टीकात्रय-सप्तटिप्पण्यादिबहुव्याख्याभिर्युतम्) संपादकः के.टि.पाण्डुरङ्गी, द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्, बेङ्गळूरु.१९९८-२००२.
ब्रह्मसूत्रभाष्यार्थमञ्जरी (वेदगर्भनारायणाचार्यरचिता) मातृकास्थलम् - अडयार्ग्रन्थालयः चेन्नै, फ्रेञ्च् इन्स्टिट्यूट् पाण्डिचेरि.
ब्रह्मसूत्ररामानुजभाष्यम् (श्रुतप्रकाशिकासहितम्) संपादकः वीरराघवाचार्यः, उभयवेदान्तग्रन्थमाला, चेन्नै १९६७.
भागवततात्पर्यम् द्र० द्र० सर्वमूलग्रन्थाः १.
मध्वविजयः मूलमात्रम्, संपादकः टि.आर्. कृष्णाचार्यः, कुम्भकोणम्, १९०१.
महाभारततात्पर्यनिर्णयः द्र० सर्वमूलग्रन्थाः १.
लघुशब्देन्दुशेखरः नागेशभट्टकृतः चन्द्रकलाव्याख्योपेतः, काशीसंस्कृतसिरीस् ५.
विष्णुतत्त्वनिर्णयः (टीकया अनेकटिप्पणीभिश्च युतः) मध्वराद्धान्तसंवर्धकसभा, चेन्नै १९६९.
शर्करिका द्र० श्लोकवार्तिकम्
श्लोकवार्तिकम्
१. न्यायरत्नाकरसहितम्, संपादकः द्वारिकादास शास्त्री, प्राच्यभारतीसिरीस् १०, वाराणसी, १९७८
२. शर्करिकासहितम्, संपादकः कुन्हन् राजा, मद्रपुरीयविश्वविद्यालयसंस्कृतसिरीस् १७, मद्रपुरी, १९४६
सन्न्यायरत्नावळी पद्मनाभतीर्थकृता अनुव्याख्यानटीका, संपादकः सवणूरु गोविन्दराव् पूना १९३७.
सर्वमूलग्रन्थाः
१. संपादकः बन्नञ्जे गोविन्दाचार्यः अखिलभारतमाध्वमहामण्डलम्, उडुपी बेङ्गळूरु, (पञ्च संपुटेषु) १९६९-१९८०.
२. संपादकः व्या.प्रभञ्जनाचार्यः व्यासमध्वसेवाप्रतिष्ठानम् बेङ्गळूरु १९९९.
सारस्वतव्याकरणम्
१. हरिदाससंस्कृतग्रन्थमाला ४ वाराणसी.
२. (प्रसाद-चन्द्रकीर्तिव्याख्यायुतम्) काशीसंस्कृतसिरीस् १११, वाराणसी.